
॥ इन्द्रयज्ञः ॥

श्रीवासिष्ठान्तेवासी तपः शिष्यः

दैवरातः



ईं ॐ श्रीः

॥ इन्द्रयज्ञः ॥

॥ सप्रयोगः ॥

* श्रीवासिष्ठोपदिष्टमन्त्रकल्पः *

श्रीवासिष्ठान्तेवासी तपः शिष्यः दैवरातः

प्रकाशकः
श्री दैवरातः
ऋषिकुल योगाश्रमः
गोकर्णः

मुद्रक
आकृति प्रिंटर्स्
आनंदमुद्रणालय
गोकर्ण – ५८१ ३२६ (उ.क.)
दूरवाणी : (०८३८६) २५६५५४

हिन्दू विश्वविद्यालय काशी
रुइया छात्रावास
संरक्षक–कार्यालय

का. शु. ७ सं. २०१६
दिनांक २६–१०–६०

आकारो हृस्वः कीर्तिश्च महती ।

तत्र भवद्भिः श्रीमद्भिः प्रातःस्मरणीयचरितैः ब्रह्मर्षि दैवरातमहोदयैः दुरवगाहऋग्वेदमहौदधिं उन्मथ्य सङ्कलितः सप्रयोगः "इन्द्रयज्ञः" सेतिकर्तव्यताको मया सम्यक्परामृष्टः, महता परिश्रमेण निखिललोकोपकाराय विश्वशान्तिस्थापनाय च लघुकायो ग्रन्थः समग्राहि तैः । सुदृढो मम विश्वासो यदस्यावलम्बनेन भगवान्सकलवेदप्रतिपाद्य इन्द्रो देवता प्रसीदन्ती समुपासकेभ्य ऐहिकं पारमार्थिकं च फलं धोक्ष्यतीति । अतोऽस्य ग्रन्थस्योपादेयतां प्रचारणं प्रसारञ्च कायेन, वाचा, मनसा समर्थयन् ग्रंथं तत्कर्तारञ्च प्रशंसन् विरमामि ।

महामहोपाध्याय
श्रीचिन्नस्वामिशास्त्रिणां शिष्यः,
–सुब्रह्मण्यशास्त्री
मीमांसा–वेदान्ताचार्यः,
काशी हिन्दू विश्वविद्यालयाध्यापकः ।

Naurang
6 South End Park
P. O. Rash Behari Avenue.
Calcutta. 29
24th October, 1960

'Indra Yagya' published by Shri Daivaratha of the Rishikul Yogasram, Gokarna is a masterly production. Shri Daivaratha is one of the Mahatmas who is happily in our midst and is doing astonishingly valuable work in connection with the ancient Indian scriptures and practices. The publication 'Indra Yagya' although small in size is of exceptional value. It deals with the position of Indra and his Yagyas from a Hindu's enlightened point of view. He adheres closely to the Vedic texts and establishes that Indra is the embodiment of Truth. Scholars who are interested in Vedic culture will find the work of great assistance.

- Kali Prasad Khaitan

॥ ईं ॐ श्रीः ॥

* इन्द्रयज्ञ समर्पणम् *

(१)

“श्रीसत्त्वज्योतिरर्णः परमरसनिधिब्रह्मवाचावतीर्णः ।
श्रेष्ठश्छन्दोभ्युदीर्णः सकलगुणनिधिः पारमैश्वर्यपूर्णः ॥
श्रेयो–निःश्रेयसेष्टस्त्रिजगदधिपतिर्बिन्दुसत्वावशिष्टः ।
श्रीवासिष्ठोपदिष्टः श्रुतिमुखवचनाद्” इन्द्र “एवेतिशिष्टः ॥”

(२)

विश्वेषां यज्ञियानां जगतिचितिमतां ब्रह्मणां दिव्यवाचां ।
यज्ञानां दैवतानां पतिरिहपरमो यज्ञियो ज्योतिरात्मा ॥
यज्ञात्मा यज्ञदेवो निजयजनपरः सर्वहुद्यज्ञकर्मा ।
यज्ञैः सर्वैः समिष्टः प्रभवति भगवान् “इन्द्र” एवाधियज्ञे ॥

(३)

इन्द्रस्यान्तः समिष्ट्यै यजनकृतिमुखात् सर्वयज्ञंप्रपूर्त्यै
यज्ञः सेन्द्रात्मनेऽयं भवतु भगवते ज्येष्ठराजाय तस्मै ॥
वासिष्ठायात्मतुष्ट्यै गुरूगणपतये स्वेन्द्रयज्ञं सकल्पं ।
श्रद्धाप्तो “दैवरातः” प्रणिहितमनसा छन्दसैवार्पयिष्ये ॥

इत्यादि विज्ञापयिता
वेदविधेयः
श्रीवासिष्ठान्तेवासी
दैवरातः

॥ ईं ॐ श्रीः ॥

भूमिका

"इन्द्र इति ब्रवीतन" (ऋ० ८/९२/२) "श्रदस्मै धत्त सजनास इन्द्रः" (ऋ० २/१२/५) "सर्वं तदिन्द्र ते वशे" (ऋ० ८/९३/४) इत्यादि (ऋङ्मन्त्रवर्णश्रवणमात्रेण अन्तर्हृदये किञ्चिदिवैव अकस्मात् संस्फुरति, काचिदशरीरा देवतात्मा दिव्या व्योमवाणीव निनदतीव प्रतिभाति, छन्दः शरीरा काचित् स्वरवती मातेव अस्मान् प्रसुप्तान् प्रबोधयतीव अनुश्रूयते, तस्मिन् इन्द्रे श्रद्धाधानार्थं प्रचोदयन्तीव प्रतीयते, तस्मात् "इन्द्र" इति तन्नामानुवचनमेवास्माकं सर्वथा शरणमिति तदेवानुचिन्त्यते, "सत्यमेवैतत्सर्वं", ऋषीणां सा वागेव सत्या मन्त्रमयी प्रत्यक्ष ब्रह्मसञ्ज्ञा, सत्यमन्त्रास्ते ऋषयः। सत्यव्रताः सत्यवचनाः, सत्ययैव वाचा सत्यमेवेन्द्रं तं परमं संस्तुवन्ति, इन्द्रस्यैव सत्वं रसमनुश्रावयन्ति। तमिन्द्रमेव सत्यं प्रति बोधयन्ति। तथा च अनुश्रूयते मन्त्रवर्णः, "सत्यमिद्वा उ तं वयमिन्द्रं स्तवाम नानृतम्" इति (ऋ० ८/६२/१२)।

सः इन्द्र एव परमं सत्यं ब्रह्म, यत् खलु विश्वस्यैवास्य जगतः सद् अधिष्ठानं, यश्चपरमः स पूरूषः विश्वस्यैवास्य द्रष्टा, परमः स आत्मा, विश्वाभिर्विभूतिभिः शक्तिभिश्च परिपूर्णसत्त्वः, स इन्द्र एवेति महर्षेः इरिम्बिठेः वेदानुवचनमनुश्रूयते॥

"इन्द्रो ब्रह्मेन्द्र ऋषिरिन्द्रः पुरू पुरूहूतः ॥
महान् महीभिः शचीभिः ॥ इति०(ऋ० ८/१६)

अपि च "इन्द्रो विश्वस्य राजति । (ऋ० साम० ४४९) "विश्वस्मादिन्द्र उत्तरः" (ऋ० १०/९६/१) "अहमिन्द्रो न पराजिग्य इद्धनं न मृत्यवेऽवतस्थे कदाचन" (ऋ० १०/४८/५) "इन्द्रो यातोऽवसितस्य राजा सेदु राजा क्षयति चर्षणीनाम्" (ऋ० १/३२/१५) इत्यादयः शतशः सहस्रशश्च ऋङ्मन्त्रवर्णाः तस्य इन्द्रस्यैव सर्वश्रेष्ठत्वमुपवर्णयन्ति । तस्मात् स इन्द्र एव परा देवता, सर्वजगदधिष्ठानभूतः विश्वस्यैवाध्यक्षः सर्वैश्वर्यैः पूर्णः सर्वगुणैश्चेति सर्ववेदसिद्धान्तः ।

"इदि परमैश्वर्ये" इति धात्वर्थयोगात् स इन्द्रः परमैश्वर्यपूर्ण इत्यवगम्यते ॥ तदिदं सर्वमपि "अस्मद्गुरूवर्याणां श्रीवा सिष्ठगणपतिमुनीन्द्राणां" "मुखादेवोपलब्धं वेदमुखेन प्रकाशितं तदिन्द्रहृदयम् ॥ स च इन्दः विश्वेषां जगतामीशानः, परमः पुरूषः विश्वाध्यक्षः" "इत्येतावता महता वेदमुखेन बृहत्तमेन यथार्थतः प्रतिपादितोऽपि तथा लोकेष्वपि नाममात्रेण सुप्रसिद्धोऽपि स कश्चित् परोक्षसिद्ध एवेति प्रतीयते, न तु अग्नि-वायु सूर्या दिवत् प्रत्यक्षतो दृष्टिगोचरो भवति, नापि पुनः साक्षाद् दृग्गोचरो भवितुर्महतीत्युन्नीयते, तस्मात् स एव विमृश्यतेऽत्र किञ्चित् प्रथमतः तस्वरूपतत्त्वावबोधार्थम् ॥

* तत्वत्रये तदिन्द्रसत्तम् *

(१) अधिभौतिके तावत् प्रत्यक्षसिद्धेऽस्मिन् अचेतने जगति सोऽयमिन्द्रः वैक्षुतःज्योतिरात्मा, यः खलु अद्भिः सह उद्भूतः विद्योतते, तदैव दृग्गोचरो भवति ॥ स एव वैद्युताग्निरित्यपि वेदे स्तूयते "अप्स्वाग्ने सधिष्टव सौषधीरनुरूध्यसे" (ऋ० ८/४३/९) "महत् तदुल्बं स्थविरं तदासीद् येनाविष्टितः प्रविवेशिथापः ॥ (ऋ १०/५१/१)

(२) अधिदैवते तु–परोक्षसिद्धे सर्वेष्वपि चेतनात्मसु देवेषु अन्तर्हितः स केवलश्चेतनात्मा सुसन्दृगेव सन् सर्वेषां द्रष्टैव भवति, न तु पुनर्दृश्यते, नैव दर्शनीयतामर्हति। "सुसन्दृशं त्वा वयं मघवन् वन्दिषीमहि" (ऋ० १/८२/३) इति दृष्ट्त्वेनैव तदभिवन्दनानुश्रवणात् ॥

(३)

आध्यात्मके अस्मिन् सर्वेषां प्राणभृतामस्माकं शरीरेऽन्तः सन् अपरोक्षसिद्धः सचेतनः जीवात्मा मुख्यप्राणापरपर्यायः अयमिन्द्रः सर्वेषामिन्द्रियाणां बुध्यादीनां चेतयिता आन्तरतमः सर्वैरपि नित्यमपरोक्षत एवानुभूयते, अहमित्येव आत्मानं जानन्ति न तु पुनरिन्द्र इति" "अमी इदमेकमेको अस्मि निःषाट्" (ऋ० १०/४८) "ता अस्य ज्येष्ठमिन्द्रियं सचन्ते ता ईमाक्षेति स्वधया मदन्तीः" इति (ऋ० १०/१२४/८) "अयमस्मि जरितः

पश्यमेह विश्वा जातान्यभ्यास्मिमन्हा" (ऋ० ८/१००/४) एवमेतेषु त्रिश्वपि तत्त्वेषु तथा तत्त्वसिद्धेषु वस्तुषु "जगद्-ईश-जीवेषु" व्यस्तेषु व्यस्तः समस्तेषु समस्तः सन् स इन्द्रः स्वयमेव विराजते" एवं सः परमः पुरूषः परब्रह्मात्मसत्त्वः सर्वतत्त्वसामरस्यसिद्धः त्रिभ्योऽपि तत्त्वेभ्यः परः पूर्णः प्रचेतनः पूर्णबिन्दुवत् स्थान-मान-रूप-रेखा-संख्यादितत्त्वादतीतः सन्नेव अणीयान् तस्मिन्नेव परमेपदे पूर्णात्मैव सदा प्रतितिष्ठति । "इन्द्रस्य युज्यः सखा" इति (ऋ० १/२२/१९) श्रुतः स इन्द्रः विश्वव्यापकस्य विष्णोः सखा सन् ज्येष्ठः ज्यायान् महान् महीयाँश्च सन्, पारमैश्वर्यादियोगात् प्रभवति, वस्तुतः "परमेश्वरः" इति शब्दः नामधेयरूपः तस्मिन् "इन्द्रे" एव सर्वात्मना सार्थकतामुपैति, "इदि परमेश्वर्ये" इति धात्वर्थसामर्थ्यात् ॥

॥ मध्यमलोधिपतिरिन्द्रः ॥

॥ अन्तरिक्षाध्यक्षः ॥

सोऽयमिन्द्रः स्वयमेक एव सन् एतेषु त्रिषु भुवनेषु व्याप्तः, पृथिव्यन्तरिक्षद्युस्थानेषु भूः भुवः स्वः पदेषु "अग्नि-वायु-सूर्यात्मकेन ज्योतिषा प्रकाशते । तथाऽपि विश्वाधिपतिरपि मध्यमः सन् विद्युत्स्वरूपः मध्यमलोकाधिपतिः अन्तरिक्षाध्यक्षः इति च वेदमन्त्रेषु संस्तुतः अनुश्रूयते, न तु दृश्यते अग्नि-सूर्यवत्" अन्तरिक्षे तु अयं वायुः मरूद्रूपः मरूत्सञ्ज्ञकः प्रत्यक्षतः

सर्वतोवाति, प्रवहति, पवते च, सोऽयं स्पर्शेन त्वचा विज्ञायते, तस्मादिमं वायुं प्रत्यक्षसिद्धमेव अवलम्ब्य स परोक्षसिद्धः इन्द्रः अवगन्तुं शक्यः, नान्यथेति प्रतीयते" स च इन्द्रः मरूत्सखा, "मरूद्भिरिन्द्र सरव्यं ते अस्तु" (ऋ०) "मरूत्वन्तं सरव्याय हवामहे" (ऋ० १/१०/१/५) इत्यादि छन्दोवचनानुश्रवणात्। तस्मात् स्वान्तर्हितेन इन्द्रेणैव चेतनात्मनासङ्गतः सन् सोऽयं वायुः पवते, संगृह्यते च। "इन्द्रेण सं हि दृक्षसे" (ऋ० १/६/७) "सजोषा इन्द्र सगणोमरूद्भिः" (ऋ० ३/४७/२) इति श्रवणात् तस्मात् इन्द्रसखा अयं वायुः, इन्द्रसखामरूत् मरूत्सखा स इन्द्रः ॥

(एवमेव मरूत्पिता रुद्रः, सोऽपि मध्यमलोकाधिपतिः वैद्युत एव ज्योतिरात्मा "वसु–रुद्र–आदित्यगणदेवता संस्थायां" "आते पितर्मरूतां सुम्नमेतु" (ऋ० २/३३/१) इत्यादि श्रवणात्" ।) एवं विश्वाधिपतिरपि सोऽयमिन्द्रः वैद्युतज्योतिः सत्त्वप्राधान्यात् अन्तरिक्षाध्यक्ष इति वेदमन्त्रेषु संस्तूयते ॥

* इन्द्रयज्ञः *

अथ "तदेतत् सत्यं मन्त्रेषु कर्माणि कवयो यान्यपश्यन् तानि त्रेतायां बहुधासन्ततानि' तान्याचरथ नियतं सत्यकामाः एष वः पन्थाः सुकृतस्य लोके" (मां उ० १०/२/१)

इत्याद्यौनिषद्वचनाद् वेदमन्त्रेष्वेव सर्वाणि कर्माण्युपदिष्टानीति गम्यते ॥ तत्रापि यज्ञरूपाण्येव तानि कर्माणीति प्रतीयते"।

"यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन्, (ऋ० १०/९०/१६) "यज्ञैरथर्वा प्रथमः पथस्तते" (ऋ० ८/८३/५) "यज्ञेन वाचः पदवीयमायन् (ऋ० १०/७१/३) इत्यादिभिः ऋङ्मन्त्रवर्णैः तेषां सर्वेषां कर्मणां उपासनानां ज्ञानानामपि यज्ञरूपत्वमुन्नीयते ।

सोऽयं यज्ञ एव अस्माभिः समिष्टः तमिन्द्रमेव वर्धयति, "यज्ञ इन्द्रमवर्धयत्" (ऋ० ८/१४/५) "यज्ञो हि त इन्द्र वर्धनोऽभूत्" (ऋ० ३/३२/१२) इत्यादि ऋङ्मन्त्रवर्णेषु तदनुश्रवणात्" तथा पुनः यज्ञैः समिष्टः स इन्द्रः एव तं स्वीयं यज्ञं यजमानं च वर्धयति तदभीष्टार्थदानेन यज्ञायैव तं प्रेरयतीति सम्पद्यते ।

तत्राप्ययं विशेषं – एतेभ्यः स्तोतृभ्यो यजमानेभ्यश्च स इन्द्र एव पुरातनं जीवनीयं ऐश्वर्यं ददाति तथा तानेतान् यज्ञायैव प्रेरयति, तथा तद्यज्ञार्थं प्रत्यक्षब्रह्मरूपान् वेदमन्त्रान् प्रकाशयति, तेनैवायं यजमानः इन्द्रयज्ञं यष्टुं शक्नुयादिति श्रूयते । तदेतदिन्द्रस्यैव वैकुण्ठस्य ऋषेः आर्षं मन्त्रदर्शनम्, "अहं दां गृणते पूर्व्यं वस्वहं ब्रह्म कृणवं मह्यं वर्धनम्" अहं भुवं यजमानस्य चोदिताऽयज्वनः साक्षि विश्वस्मिन् भरे इति (ऋ० १०/४९/१)।

तस्माद् यज्ञेनैव तस्येन्द्रस्य स्वाभिमुखीकरणाय प्रभवन्ति यजमानाः "यज्ञेनेन्द्रमवसाचक्रे अर्वागैनं सुम्नाय नव्यसे ववृत्याम्" इति (ऋ० ३/३२/१२) तदिदं स्पष्टमेवानुश्रूयते, "यदङ्ग दाशुषे त्वमग्ने भद्रं करिष्यसि ॥ तवेत् तत् सत्यमङ्गिरः" इति (ऋ० १/१/६)। अयमग्निः यजमानाय यत् मङ्गलं करोति यज्ञप्रतिफलदानेन, तत् सर्वमपि अग्नेरेव भवति। यज्ञायैव तद् विनियुज्यते इति भावः।

एवमेव यज्ञेनैव तेन तस्य इन्द्रस्य साक्षात् सख्यमपि प्राप्तुं शक्नुवन्ति यजमानाः इत्यपि वेदमुखादेव विज्ञायते। ये यज्ञेन दक्षिणया समक्ता इन्द्रस्य सख्यममृतत्वमानश तेभ्यो भद्रमङ्गिरसो वो अस्तु प्रतिगृभ्णीत मानवं सुमेधसः इति ऋङ्मन्त्रवर्णः (ऋ० १०/६२/१)। एतेन पूर्वे ते देवाः ऋषयश्च यज्ञरूपेणैव साधनेन इन्द्रसख्यं अमृतत्वं च प्रापुरिति अभिप्रेयते। तस्मात् देवानां ऋषीणां मनुष्याणामिदा–नीन्तनानामपि इन्द्रेण सह सख्यप्राप्तये अमृतत्वसिद्धये च यज्ञ एव परमं साधनं इति सम्पद्यते।

स इन्द्र एव सर्वेषां यज्ञानामधिपतिः, सर्वेऽपि यज्ञाः अन्ततः परमं पुरूषं तमिन्द्रमेव प्रतिगच्छन्ति। तस्मात् इन्द्र एव यज्ञात्मा यज्ञियः। सर्वेषां यज्ञियानां दैवतानां कर्मणांच साक्षी सन् सर्वान् यज्ञानधितिष्ठतीति सङ्गच्छते "मन्ये त्वा यज्ञियं

यज्ञियानां मन्ये त्वाच्यवनमच्युतानाम्" मन्ये त्वा सत्त्वनामिन्द्र केतुं मन्ये त्त्वा वृषभंचर्षणीनां" इति श्रवणात् (ऋ० ८/९६/४)

तस्मात् परमपुरूषस्य तस्य इन्द्रस्यैव यज्ञः सर्वेष्वपि यज्ञेषु प्रधानः। श्रेष्ठतमः सर्वाभीष्टसाधकतमश्चेति सर्वात्मना सिध्यति।

॥ बाह्यो हविर्यज्ञः ॥

स च यज्ञः बाह्यः आन्तर्यश्च बहुधा वेदे समर्थितः श्रूयते। बाह्यो यज्ञः बाह्यैरेव हस्तादिभिः करणैः, हविः प्रभृतिभिरूपकरणैश्च सम्पद्यते, आन्तर्यस्तु आन्तर्यैरेवकरणैरित्ति स्वतः सिद्धं तत्त्वम्॥ तत्र बाह्यो हविर्यज्ञः। आन्तर्यो विद्वद्यज्ञः इति तत्वभेदेन दृष्टिभेदेन भावना– कामनादि भेदेन च बहुधा विधीयते, अनुष्ठीयते च, बाह्ये हविर्यज्ञे तावत् सर्वाण्यपि हवींषि अग्नावेव हूयन्ते। सोऽयमग्निरेव देवानां यष्टा यज्ञसाधनः सन् देव मनुष्ययोः सम्बन्धकारकः मध्यस्थः, दिव्य–पार्थिवतेजः सत्त्वयोगात्। अतएव अग्नेर्देवदूतत्वं, देवतामुखत्वं च स्पष्टमेव अनुश्रूयते। "अग्निं दूतं वृणीमहे" (ऋ० १/१२/१)। "अग्निर्मुखं प्रथमो देवतानां" इति च (ऐ० ब्रा० १/१)। एवमेव सर्वेषां मानवानां प्राणभृतां, सर्वेषां प्राणिनां भूतानां, पितृणां च जीवतामजीवतामपि यज्ञः तेषां मुखे जीवनीयवस्तुसमर्पणात्,

क्वचित् तेषाम् उद्देशेन अन्येभ्योऽपि स्वकीयवस्तुसमर्पणेन च सिध्यतीति वेदशास्त्रसङ्केतः प्रत्यक्षः सिद्धः ।

॥ आन्तर्यो यज्ञः ॥

अथ तथैव आन्तर्यो यज्ञोऽपि अस्ति वेदे उपदिष्टः । "सदसस्पतिमद्भुतं प्रियमिन्द्रस्यम काम्यम् सनिं मेधामयासिषम्" । (ऋ० १/१८/६) "यस्मादृते न सिध्यति यज्ञो विपश्चितश्चन । स धीनां योगमिन्वति (ऋ० १/१८/७) इति । यस्मात् इन्द्र–प्रियाद् ब्रह्मणस्पतेः विना विदुषामपि यज्ञो नैव सिध्यति । सः ब्रह्मणस्पतिः धीनां आन्तर्यं योगं तमनुसृत्य स्वयमेव प्रकाशते इति भावः ॥

बाह्ये हविर्यज्ञे ऋत्विजो यज्ञियं कर्म अनुतिष्ठन्तो बहवो भवन्ति । "तवाग्ने होत्रं तव पोत्रमृत्वियं तव नेष्ट्रं त्वमग्निदृतायतः । तव प्रशास्त्रं त्वमध्वरीयसि ब्रह्मा चासि गृहपतिश्च नो दमे (ऋ० २/१/२) इति ।

तत्र ऋग्भिः यजुर्भिः सामभिश्च यज्ञमनुतिष्ठन्तः होता, अध्वर्युः, प्रशास्ता, आग्नोध्रः, ब्रह्मा चेति पञ्च ऋत्विजः प्रधानाः प्रसिद्धाः ॥ तथा आन्तर्येपि यज्ञे ऋत्विक्स्थानीया पञ्चधियो विद्यन्ते । ताश्च श्रोत्रं चक्षुः प्राणः मनः वाक्चेति पञ्च इन्द्रियात्मिकाः, प्रसिद्धाः, सर्वेषामपि स्नान्तरनुभवसिद्धां, एते एव आन्तर्यधीयोग–यज्ञसाधकाः ऋत्विजः ॥ "वि मे

कर्णा पतयतो विचक्षुर्वी ३ दं ज्योतिर्हृहय आहितं यत्। वि मे मनश्चरति दूर आधीः किं स्विद् वक्ष्यामि किमु नू मनिष्ये (ऋ० ९/९/६) इति।

पञ्चानामृत्विजां एतेषां धीन्द्रियाणां च अस्ति साम्यं समानरूपत्वं च देवतासत्त्वयोगात्। "कर्णः, चक्षुः, प्राणः, मनः, वाक्" एत्येतेषां "दिक्, सूर्यः, वायुः, सोमः अग्निश्च" इति देवताः क्रमेण भवन्ति। "चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत। मुखादिन्द्रश्चाग्निश्च प्राणाद् वायुरजायत"। (ऋ० १०/९०/१३) नाभ्या आसीद। इति च सश्रुताः। तथां लोकाँ अकल्पयन् (ऋ० १०/९०/१४)

हविर्यज्ञेऽपि, "होता, उद्गाता, अध्वर्युः ब्रह्मा, आग्नीध्रः इत्येतेषामृत्विजां "अग्निः, वायुः, सूर्यः, सोमः दिक् च" इति एताः देवताः।

आन्तर्ये विद्वद्यज्ञे तु "वाक्, प्राणः चक्षुः, मनः श्रोत्रं" चेति पञ्च धीन्द्रियाणि ऋत्विक् स्थानीयानि। तथा च औपनिषदं ब्राह्मणम्–"तस्यैवंविदुषो यज्ञस्यात्मा यजमानः श्रद्धा पत्नी०" इत्यादि उपक्रम्य "दक्षिणा वाग्घोता, प्राण उद्गाता, चक्षुरध्वर्युः, मनो ब्रह्मा, श्रोत्रमग्नीद् यावद्ध्रियतो सादीक्षा" इति तेषां–निर्देशात् (ना० उ० खाण्डः –२५) अत्र आन्तर्येयज्ञे विद्यमानानां

इन्द्रियाणां तथा बाह्ये हविर्यज्ञे गृहीतानामृत्विजां च साम्यं समानदेवतासत्वं च दृश्यते ।

ऋचं वाचं प्रपद्ये, मनो यजुः प्रपद्ये, सामं प्राणं प्रपद्ये, चक्षुः श्रोत्रं प्रपद्ये" इति (शु० य० सं०) पञ्चेन्द्रियाणां निर्देशः यज्ञीयाङ्गत्वेन इति स्पष्टम् ।

॥ इन्द्रयज्ञस्य बृहत्कल्पः ॥

तदेतत् सर्वमपि इन्द्रयज्ञस्य "बृहत्कल्पे" विस्तरशः समर्थितमस्ति, सतत्वं सप्रयोगं सार्थं च, तत्र चतुर्ष्वपि वेदेषु पठितानां प्रायः सर्वेषामपि इन्द्रदैवत्यमन्त्राणां संशोधनेन बहवो विशेषाः यज्ञाङ्गेषु कर्मसु संगृहीताः सन्ति ।

तस्मिन् कल्पे प्रथमतः ऋग्वेदे पठितानां सर्वासामपि इन्द्र दैवत्यानां ऋचां, तथा ऐन्द्राग्नप्रभृतीनां ऐन्द्रद्विदैवत्यानां च तस्मिन् 'इन्द्रयज्ञे' यजनार्थं विनियोगोऽस्ति विहितः ।

तथा "यजुः–साम–अथर्ववेदेश्वपि पठितानामपि ऐन्द्रदैवत्य मन्त्राणां तद्द्विदैवत्यमन्त्राणां विनियोगोऽभिहितः, तत्सर्वमपि वा अनुष्ठातुं शक्यम् ॥

"ऋग्वेदस्थानां तदैन्द्रमन्त्राणां परिगणाना" ।

तस्मिन् बृहत्कल्पे प्रथमतः संङ्गृहीता ऋग्वेदस्थाः इन्द्रदैवत्याः ऋचः द्विषष्ट्युत्तरं, अष्टौ शतानि, द्विसहस्त्रम्, (२८६२)

मन्त्राः सन्ति। वास्तोष्पत्याः चतस्त्रः, तथा इन्द्रद्विदैवत्याः चतुश्चत्वारिंशदुत्तरं त्रिशतं (३४४) मन्त्राः सन्ति सर्वसाहित्येन "दशाधिकम्, शतद्वयं, सहस्त्रत्रयं च" ऋङ्मन्त्राणां ऐन्द्राणां परिगणना भवति (३२१०) मन्त्राः ऋग्रूपाः ऋग्वेदान्तर्गताः। यावन्त्यो वै ऋचः तावन्त्यः आहुतयो भवन्ति। एवं अन्यवेदस्था अपि ऐन्द्रमन्त्राः पृथगेव सङ्गृहीताः सन्ति, सर्वेषामपि तद्यजनसौकर्यार्थम्।

अत्र प्रधानयजनात् पूर्वं पूर्वाङ्गहवनं भवति। तच्च "गायत्रीमन्त्रेण चतुर्वेदीयैः प्रथमैः चतुर्भिमन्त्रैश्च सम्पद्यते। तथा उत्तराङ्गहवनं च ऋग्वेदान्तिमेन चतुर्ऋचेन सज्ञानेन सूक्तेन समाप्यते।

॥ अथ वासिष्ठोपदिष्टमन्त्रकल्पः ॥

अस्मिन् कल्पे "वासिष्ठोपदिष्टानां" एव केषांचित् ऋङ्मन्त्राणां प्रधानयजनेविनियोगेन अयं-"इन्द्रयज्ञः" संक्षेपतः समर्थितः। अत्र प्रधानयजने प्रथमतः गायत्रीमन्त्रेण यजनं भवति।

(१)

"तत् सवितुर्वरेण्यम्... प्रचोदयात्॥ इति (ऋ. ३६२/१०) सेयं ऋक् चतुर्ष्वपिवेदेषु पठिता अनुश्रूयते, सेयं गायत्री प्रत्यक्ष ब्रह्मरूपा सर्वेषां वेदानां छन्दसां च प्रथमा माता, "गायत्रीं छन्दसां माता" इति स्पष्टं (ना. उ. खं. १५/१) औपनिषदं यजुर्वचनम्॥ "स्तुतो मया वरदा वेदमाता प्रचोदयन्ती पवने द्विजाता" इति (ना. उ.)।

"स्तुता मया वरदा वेदमाता प्रचोदयन्तां पावमानी द्विजानां ॥ इति ॥ (अथर्व सं०) इति च तदनुश्रवणात्। सोऽयं ऋङ्मन्त्रः द्विजत्वसिद्धये उपनयने उपदिश्यते द्विजातिभ्यो बटुभ्यः । सोऽयं अस्मिन् इन्द्रयज्ञे प्रथमतः प्रधानयजनार्थ सङ्गृहीतः ॥ ब्रह्मयज्ञादौ तथाविधानु सन्धानविधानदर्शनात्। सोऽयं मन्त्रः वासिष्ठस्यपि अभीष्टः प्राधान्येन ब्रह्मवर्चस्त्व सम्पादकः सर्वानुमतश्चेति सुप्रसिद्धम् । वासिष्ठेनापि उपदिष्टः स्वपुत्राय महादेवाय। अथ श्रीवासिष्ठमुनिना तत्र तत्र शिष्याणामनुग्रहार्थं उपदिष्टाः बहवो वैदिकाः मन्त्राः विद्यन्ते । ते च प्रायः "वासिष्ठवैभवे" निर्दिष्टाः सन्ति केचित्।

(२)

"वनेमपूर्वीरर्योमनीषा अग्निः सुशोकोविश्वन्यश्याः" इति। (ऋ० १/७०/१)। पराशरः ऋषिः अग्निर्देवता। द्विपदा विराद् छन्दः।

अयं वासिष्ठस्य साङ्गिको मन्त्रः सर्वेषां भारतीयानां समग्रस्यापि भारतस्य श्रेयः साधनसमर्थः इति तत्सम्मतः वासिष्ठेन बहुभ्यः उपदिष्टः, तज्जपादि मुखेन प्रवर्तितश्च, वासिष्ठानुयायिभिः प्रायः सर्वैरपि गृहीतः सन् इदानीमपि उपास्यते।

(३)

"रायस्कामो वज्रहस्तं सुदक्षिणं पुत्रो न पितरं हुवे" इति। (ऋ० ७/३२/३) वसिष्ठ ऋषिः, इन्द्रो देवता। द्विपदा विराट् छन्दः। अयमैश्वर्यप्रदः इन्द्रदैवत्यः।

(४)

"इन्द्रो विश्वस्य राजति" (साम० ४५६) इति। एकपदा गायत्री "सामवेदे पठितः। अयं मन्त्रः इन्द्रस्यैव विश्वसार्वभौमत्वं समर्थयति।

(५)

"अतू न इन्द्र क्षुमन्तं०, महाहस्ती दक्षिणेन" इति (ऋ० ८/८१/१) कुसीदी काण्वः ऋषिः, इन्द्रो देवता, गायत्री छन्दः, अयं मन्त्रः महाहस्तिमुखतत्त्वेन इन्द्रस्यैव महागणपतिसत्त्वं बोधयति। सोऽयमैश्वर्यसङ्ग्राहको मन्त्रः।

(६)

इन्द्र श्रेष्ठानि द्रविणानि धेहि०–सुदिनत्वमह्नाम्। इति (ऋ० २/२१/६) गृत्समदः ऋषिः, इन्द्रो देवता, त्रिष्टुप्, छन्दः, अयं मन्त्रः मन्त्रे एव पठितान् सर्वानपि श्रेष्ठान् अर्थान् दातुं समर्थः, चेतना–शक्तिप्रदः।

(७)

"त्वं न इन्द्र वाजयुः–त्वं हिरण्ययुर्वसो" इति (ऋ० ७/३१/३) वसिष्ठः ऋषिः, इन्द्रो देवता, गायत्री छन्दः। अयं मन्त्रः गो–भू–धन–धान्यादि सर्वैश्वर्यप्रदः।

(८)

"सं होत्रं स्म पुरा नारी०– विश्वस्मादिन्द्र उत्तरः" इति (ऋ० १०/८६/१०) इन्द्राणी ऋषिका, इन्द्रो देवता, पंक्तिः छन्दः, अयं मन्त्रः वीर भावप्रदः शक्तिप्रदश्च।

(९)

इन्द्राणीमासु नारिषु०–विश्वस्मादिन्द्र उत्तरः । इति । (ऋ० १०/८६/४) इन्द्रः ऋषिः, इन्द्राणी देवता, पंक्तिः छन्दः । अयं मन्त्रः स्त्रीणां सौभाग्यप्रदः । पुंसां शक्तिप्रदः ।

(१०)

"जातवेदसेसुनवाम सोमम०–दुरिताऽत्यग्निः" इति (ऋ०१/९९/१) । मारीचः कश्यपः ऋषिः, जातवेदा अग्निः देवता, त्रिष्टुप् छन्दः । अयं मन्त्रः महेन्द्रपर्वते वासिष्ठेन उपासितः । महामन्त्रः इत्युपदिष्टः । ऋग्वेदे अस्य एकर्चस्य एकस्यैव सूक्तस्य विद्यमानत्वात् । काश्यपार्षये सहस्रसूक्तमूलभूतत्वाच्च । अयं वाङ्मनः सत्त्वप्रदः सर्वज्ञानप्रदः शत्रुद्वेषादिनिवारकः, दुर्ग–दुःखदुरितादिभ्यस्तारकश्च ।

(११)

"त्र्यम्बकं यजामहे०–माऽमृतात् इति । (ऋ० ७/५९/१२) वसिष्ठः ऋषिः । रूद्रः देवताः, अनुष्टुप् छन्दः । अयं मन्त्रः वेदार्थज्ञानोदयार्थं गोकर्णे श्री० वे० दीक्षित दत्तात्रेयोपाध्यानां मुखाद् वासिष्ठेन गृहीतः तथा उपासितश्च, तथैव पुनर्महामन्त्र रूपेणोपदिष्टश्च । अभिमतश्च अस्य मन्त्रस्य पदपाठे पदविभागा दर्शनात्–इति ॥

(१२)

"दिवो गभस्तिररतिः पथिव्यास्त्वेषं रूपं दिद्युतो योऽन्तरिक्षे । वैश्वानरः सहसा वा ँ अमर्त्यो मधुमन्माऽऽरोहतु दस्मईक्षाम् ॥ वासिष्ठ ऋषिः । वैश्वानरो देवता । त्रिष्टुप् छन्दः ॥ अयं ऋङ्मन्त्रः वासिष्ठमुखादेव तपसा दर्शनरूपेण आविर्भूतः । तत्प्रसादरूपेण तेषामेव प्रीत्यर्थं तदनुग्रहोदयार्थं च अत्र यजनार्थं संगृहीतः ।

(१३)

"अक्रमिष्ट भुवनेषु ब्रह्मणाऽहं वितूर्यतः । प्रवरोऽथास्मिविप्रः ॥ वासिष्ठ ऋषिः विष्णुः देवता । गायत्री छन्दः । अयं मन्त्रोऽपि वामिष्ठदर्शनेनैव उपलब्धः । तेषामेव प्रसादार्थं अस्मिन् यजने संगृहीतः ।

(१४)

"भद्रं नो अपि वातय मनः (ऋ० १०/२०/१) । ऐन्द्रो विमद ऋषिः । अग्निर्देवता । द्विपदा विराट् छन्दः । अयं मन्त्रः मनः शान्ति शक्तिप्रदः । चतुर्वेदीयो महाशान्तिमन्त्रः । वासिष्ठेनापि स्वीकृतः । उपदिष्टश्च ।

॥ गुरूपदिष्टमन्त्रेण विशिष्टं हवनम् ॥

इतः परं प्रधानयजनान्तरं स्वस्वाभीष्ट–विशिष्टार्थ सिद्धये स्वस्वगुरूपदिष्टैः अन्यैः वैदिकैरेवमन्त्रैः यजमानः ऋत्विग्गणश्च तद् विशिष्टं हवनं कर्तुमर्हति ॥

"तामाग्निवर्णां तपसा ज्वलन्तीं वैरोचनीं कर्मफलेषु जुष्टाम् । दुर्गां देवीं शरणमहं प्रपद्ये सुतरसि तरसे नमः । (ना० उ० खं० ६/३) इति ।

अयमौपनिषदो यजुर्मन्त्रः । कृष्णयजुर्वेदे नारायणोपनिषदि पठितः । मूलतो वैश्वदेवकाण्डस्थः ॥ एकदा सिद्दापुरसमीपे त्यागले ग्राम निकटे चन्द्रगिरि क्षेत्रे श्री रेणुकाम्बायाः सन्निधौ तपश्चरतः श्री वासिष्ठस्य मुखादेव अकस्मान्निर्गतोऽयं मन्त्रः महता आवेशेन । तस्मात् तदुपसनार्थं उपदिष्टो भक्तेभ्यः । दिव्य शक्तिप्रदः इति विशेषः । तस्मात् अत्र बहूनां वासिष्ठ भक्तानां मतेन यजनार्थं संगृहीतः । एवमेव अन्यैरपि मन्त्रैः स्वस्वगुरूपदिष्टैः अन्येऽपि होतुं शक्नवन्ति ।

अत्र "तत्सवितुर्वरेण्यं," वनेम पूर्वीः – "रायस्कामः, इन्द्रो विश्वस्य राजति" इति चतुर्णां मन्त्राणां अष्टोत्तरशतसङ्ख्याकाः आहुतयाः, अन्येषां दशमन्त्राणां प्रत्येकं अष्टौ आहुतयः, "तामग्निवर्णां" इति दुर्गामन्त्रस्य नवैवाहुतयः, परिकल्पिताः सन्ति । तत्र यथा सौकर्यं यथाभावं न्यूनाधिक्यतयाऽपि अनुष्ठातुं शक्यमिति विशेषः ।

॥ यज्ञियानि साधनानि बाह्यानि तदुपकरणानि ॥

अस्मिन् बाह्ये हविर्यज्ञे भौतिकेऽस्मिन्नग्नौ हविर्हवनार्थं दिव्यदेवतातत्वसिद्धये समन्त्रकं–अग्निप्रतिष्टापनम् ॥ तथा

अस्मिन्नेवाग्नौ अन्येषामपि केषांचिद् दिव्य देवता सत्त्वानामुदयेन साक्षादग्निमुखत्व सिध्यर्थं, अन्यान्यपि कानिचिद् यज्ञाङ्गानि दैवतानि, द्रव्याणि, कर्माण्यपि भवन्ति वेदोपदिष्टानि शास्त्रविहितानि ऋषिभिः दर्शितानि च, यज्ञेषु तैरेव पूर्वमनुष्ठितानि च। तेषां सर्वेषामपि साहित्येन सिद्धं अग्नेः साक्षाद्देवतात्वसाधकं सत् तदेतत् – "अग्निमुखम्" इति व्यवह्रियते । तदेव देवतामुखसत्वसाधकं भवितुमर्हति ॥

(१) "वेदि" :– अग्निप्रतिष्ठापनार्थं शास्त्रीयेन तत्त्वेन विरचितं "वर्तुल–त्रिकोण–चतुष्कोण षट्कोण– अष्टदलादिरूपेण निर्मितम्, कुण्डरूपं स्थण्डिलादिरूपं वा, पृथिव्यामेव "गर्त–रेखामेखलादिभिः हस्तपरिमाणादिना च शास्त्रीयेण प्रमाणेन पात्रीकृतं, वेदमन्त्रैः संस्कृतं, मृत्तिकागोमयादि परिलेपनेन पवित्रीकृतं, अलंकृतं च सुरूपवर्णादिना देवतानुरूपं वेदिसदनमेव अग्निप्रतिष्ठापनार्हं भवति ॥

"इयं वेदिः परो अन्तः पृथिव्या अयं यज्ञो भुवनस्य नाभिः ॥ इति (ऋ० १/१६४/३५) मन्त्रवर्णात् । एवमेव वेदेरलङ्करणमपि वेदविहितमेव, महतामनुरूपमेवतद् भवितुर्महति ॥

"अरं कृण्वन्तु वेदिं समग्निमिन्धतां पुरः ॥

तत्रामृतस्य चेतनं यज्ञं ते तनवावहै ॥ (ऋ० १/१७०/४)

इति तदनु श्रवणात् ॥

(२) "समिधः" इध्मार्थं हवनार्थं च उपयुक्ताः, अश्वत्थादि यज्ञीय वृक्षाणां काष्ठरूपाः । अग्नि समिन्धनार्थाः, ताभिरेव पञ्चदशभिः ऐकविंशतिभिर्वा समिद्भिः निबद्धः इध्मः । स च यजनात् पूर्वं अग्नेः प्रज्वलनार्थं प्रथमतः समन्त्रकमेव हूयते ॥

(३) "कुशाः" – ते च वानस्पत्याः बहुविधा भवन्ति । "शरासः कुशरासोदर्भासः सैर्या उत । मौञ्जा अदृष्टा बैरिणाः सर्वे साकं न्यलिप्सत ॥" इति (ऋ० १/१९१/३) ऋङ्मन्त्रेऽनु श्राविताः यज्ञियाः तृणविशेषाः स्वयं पवित्राः पवित्रीकरण समर्थाः । ते च अस्मिन् यज्ञे "पवित्रार्थं, इध्मा–बर्हिषोः सन्नहनार्थं, अग्नेः संरक्षणाय परिस्तरणार्थं, देवानां हविषां च आसादनाय बर्हिषः आस्तरणार्थं, हविरादीनां प्रोक्षणार्थं, अन्येषां यज्ञपात्रादीनां परिशोधनार्थं च शास्त्रविहिता उपयुज्यन्ते ।

(४)

"आपः"–प्रसिद्धाः स्वयं पवित्राः । ताश्च यज्ञे माङ्गल्य प्रदर्शनार्थं, पवित्रीकरणार्थं, आचमनादिना शुच्यर्थं, पात्रादि प्रोक्षणार्थं, यज्ञान्ते अवभृताभिषेकार्थं, च शास्त्रविहिताः समन्त्रका एव उपयुज्यन्ते, यज्ञीयत्वसाधनाय ।

(५)

"हविर्द्रव्याणि" – हवनप्रधानस्य हविर्यज्ञस्य सिद्धये प्रधान साधनानि घृतादीनि । तानि च "घृत–दुग्ध–दधि–दूर्वा–तिल–यव–चरू–पायस–समित् प्रभृतीनि हविष्याणि ।

(६)

"यज्ञपात्राणि"–हविर्हवनादिषु आवश्यकानि, अश्वत्थादि यज्ञीयकाष्ठनिर्मितान्येवार्हन्ति समन्त्रकं यज्ञं यदुष्टम् । तानि च प्रोक्षणी–स्रुवौ, प्रणीता–आज्यपात्रे, च अस्मिन् यज्ञे विनियुज्यन्ते, अन्यत्र तु दर्वी–स्रुवौ, इत्यादीन्यपि अधिकानि भवन्ति । अग्निमन्थने अरण्यौ च विशिष्टे, चरूश्रपणे चरूस्थालीच ।

॥ याज्ञाङ्गानि विशिष्टकर्माणि ॥

सर्वेष्वपि यज्ञेषु प्रधानस्य अग्नेः दिव्य देवतामुखत्व सिद्धये आन्तर्यसूक्ष्मतमदिव्यसत्त्वोदयाय च कानिचिद् यज्ञाङ्गानि समन्त्रकरणानि अपूर्व तत्त्वसाधकानि विशिष्ट कर्माणि भवन्ति ।

(१)

अग्निमन्थनम् – "अरण्योर्निहितो जातवेदाः" (ऋ० ३/२९/२), "मन्थता नरः कविमद्वयन्तम्० – अग्निं नरो जनयता सुशेवं" (ऋ० ३/२९/५) इति च ऋङ्मन्त्रवर्णात् अरणीभ्यां मथनेनोद्भूत एवाग्निः यज्ञायार्हतीति गम्यते । "निर्मथितः सुधित अःसधस्थे युवा कविरध्वरस्य प्रणेता" इति (ऋ० ३/२३/१) स्पष्टमेव तदनुश्रवणात् । तस्मात् अरणीभ्यां तदग्निमन्थनेन तज्जननमेव तत् प्रथमं कर्मेति सिध्यति ॥

अथवा सूर्यकिरणाद् गृहीतोऽग्निरपि यज्ञार्होभवति। "अभित्वा देव सवितरीशानं वार्याणाम्। सदावन् भागमीमहे" इति (ऋ० १/२४/३)। सवितुरेवांशरूपस्य अग्नेः प्राप्त्यर्थं तदभ्यर्थनादिश्रवणत्।

(२)

अग्नि प्रतिष्ठापनम्– समन्त्रकं प्रतिष्ठापित एवाग्निः दिव्य भावेन देवतामुखसत्त्वेन सम्पन्नः सन् देव यजनायार्हति॥

(३)

अग्निदेवतावाहनम्– अग्नौ भौतिकेऽस्मिन् प्रत्यक्षसिद्धे परोक्षसिद्धदिव्यदेवतास्वरूपसत्त्वसिद्धये समन्त्रकं दिव्यदेवा वाहनमेव प्रधानं साधनं भवति। तस्मादेव सर्वत्रापि यज्ञे आवाहनार्थकिनैव मन्त्रेणा अग्निदेवतामावाहयन्ति। देवतासान्निध्य सम्पादनार्थम्।

(४)

अग्निदेवताध्यानम्– हविः प्रदाने अग्निदेवता स्वरूपानुसन्धान नियमात् तद्ध्यानं विहितं, देवताध्यान पूर्वकं हुतेनैव हविषा साक्षाद्देवता यजनसिद्धेः, ध्यानं च तत् मन्त्रार्थानुसन्धान पूर्वकमेव कर्तुं युक्ततरमिति प्रतीयते।

"चत्वारि शृंगा त्रयो अस्य पादाः" । (ऋ० ४/५८/३) इत्यादि वस्तुतत्त्वज्ञानोपबृंहितं ध्यानमेव विशिष्टमिति च उन्नीयते ।

(५)

अग्नेरर्चनम्– अतिथिसत्कार इव प्रथमतः तदादरार्थं समन्त्रकं तदर्चनं युक्ततरम्, "अर्चन्त्यर्कमर्किणः" (ऋ० १/१०/१) । "अर्चत प्रार्चत प्रियमेधासो अर्चत । अर्चन्तु पुत्रका उत पुरं न धृष्ण्वर्चत (ऋ० ८/६९/८) इत्यादिऋङ्मन्त्रवर्णमुखेनैव तदर्चन विधानानुश्रवणात् ।

(६)

इध्महवनम् – समन्त्रकमेव तद् भवितुमर्हति । "यस्त इध्मं जभरत् सिष्विदानः" (ऋ०) "इध्मं यस्ते जभरच्छश्रमाणो महो अग्ने अनीकमासपर्यन् । स इधानः प्रति दोषामुषासं पुष्यन् रयिं सचते घ्नन् अमित्रान्" (ऋ० ४/१२/२) इति । इति तदिध्महवनानुश्रवणात् ।

(७)

"आधारहवनम् – तच्च आधारहवनं प्रजापतिदैवत्यं, चतसृणां विदिशां, अष्टानां च दिशां गुप्ततर सत्त्वसिद्धये उपांशुमन्त्रोच्चारेण द्वे प्राजापत्याहुती जुहुयात् । ते च वायव्याग्नेययोः निऋतीशानयोः द्वयोर्द्वयोः विदिशोः संयुक्तशक्तितत्त्वसम्पादनार्थं प्रभवतः ।

"पूषा राजानमाघृणिः" (ऋ० १/२३/१४) "मानोरक्षं आवेशीदाघृणीवसो० (ऋ० ८/६०/२०) इत्यादि मन्त्रवर्णेषु आधारप्रदीप्तस्य अग्नेः रक्षोभ्यः यज्ञरक्षणादिवीर्यवत्तर कार्यादि श्रवणात्। "प्रजापते न त्वदेवान्यन्यः" (ऋ० १०/१२१/१०) इति तदाधार मन्त्रः।

(८)

चक्षुषी– अग्नीषोमौ। अग्नौ वाङ्मनः सत्त्वसिध्यर्थं, संविदिच्छा शक्तितत्त्वोदयार्थं, ज्योतीरसयोः ज्योतीरसात्मनोः अग्नीषोमयोः सम्पत्तये भोक्तृ-भोग्यस्वरूपसिद्धये तादृशदृक्शक्तिसिद्धये च तौ आज्यभागौ भवतः॥ अस्मिन् ऐन्द्रे यज्ञे तु तावग्नीषोमौ वात्रघ्नावेव भवितुमर्हतः॥ इन्द्रसत्त्वयोगासिध्यर्थम्॥ "अग्निर्वृत्राणि जङ्घनत्०" (ऋ० ६/१६/३४) "त्वं सोमासि सत्पतिस्त्वं राजोत वृत्रहा०" (ऋ० १/९१/५) इति तयोरग्नीषोमयोः वृत्रहननशक्तिसत्त्वं अनयोर्मन्त्रयोरस्ति। वृत्रहननत्त्वं च तदग्नेर्वैद्युताग्निरूपत्वात्। सोमस्य तु अपां रससत्वयोगात् विद्युत्–साहचर्याच्च सङ्गच्छते।

अतएव ऐन्द्रद्विदैवत्ये "इन्द्राग्न्योः, इन्द्रासोमयोः" योगः अग्नीषोमयोर्योगेनैव सम्पद्यते। तदेतत् सर्वामपि तत्त्वं अग्नौ यजनीये देवतात्मनि, यजमाने तद्देवतानां यष्टरि च समानभावोदयार्थं कल्पते इति वेदशास्त्रसङ्केतः।

तच्च विस्तरशः बृहत्कल्पे समर्थितं द्रष्टव्यम् । अत्र एतेषु यज्ञीयेष्वङ्गेषुन्यूनेषु तत्सत्वानामपि न्यूनतया तदङ्गानामपूर्णताऽपि भवतीति वैदिकं तदार्षेयं रहस्यं ।

एतावदन्तं अग्निमुखं कृत्वा ततः पूर्वाङ्गहवनमनुतिष्ठेत् ।

(९)

"पूर्वांगहवनम्" – तच्च प्रधानयजनात् प्रागेव अनुष्ठेयम् ॥ तत्र "तत्सवितुर्वरेण्यम्" इति गायत्रीमन्त्रः, 'अग्निमीळे पुरोहितम्' 'इषे–त्वोर्जे त्वा' "अग्न आयाहि वीतये....शंनोदेवीरभिष्टये" ॥ इति चतुर्णां वेदानां आदिमाः । चत्वारो मन्त्राः ग्राह्याः एतैर्मन्त्रैः प्रथमतः प्रत्येक एकैकामाज्याहुर्तिजुहुयात् ॥ पञ्चैव ता आहुतयो भवन्ति पूर्वाङ्गहवने ॥

(१०)

"प्रधानयजनम्"–तत्र गायत्रीमन्त्रादयः चतुर्दशमन्त्राः निर्दिष्टाः । तेषु आद्यानां चतुर्णां मन्त्राणां प्रत्येकं अष्टोत्तरशताहुतयः । ततः दशानां प्रत्येकमष्टौ आहुतयः, एवं द्वादशाधिकं पञ्चशतं आहुतयः, (५१२) ताः पूर्णसंख्याकाः सम्पद्यन्ते ।

(११)

"गुरूपदिष्टमन्त्रेण विशिष्टं हवनम् ।" 'तामग्निवर्णाम्' इति दुर्गामन्त्रः । तस्य, नवैव आहुतयो भवन्ति । तदेतत् सामान्यतो

दर्शितम्, तत्र संख्यामात्रे न्यूनाधिकं कर्तुमर्हन्ति यथा भावम्।

(१२)

'उत्तराङ्गहवनम्'–ऋग्वेदान्ते पठितेन चतुर्ऋचेन सञ्ज्ञानसूक्तेन चतस्त्रः आहुतीः जुहूयात्।

अत्र पूर्वाङ्गे उत्तराङ्गे च हवने किञ्चिद् विशिष्टाभीष्टार्थसाधकं हवनमपि बृहत्कल्पे दर्शितम् । स्वस्वसौकर्यानुसारेण श्रद्धा–भक्ति–भावनादिविशेषेण यावच्छक्यं तदनुष्ठातुमर्हन्ति भवन्तः ।

(१३)

"स्विष्टकृद्यजनम्" – यज्ञे न्यूनातिरेकादिदोषनिरासेन यज्ञस्य सुष्ठुतासम्पत्तये, इष्टकृते च तद् यजनं विधीयते। तत्रायं मन्त्रः–"अग्ने यदद्य विशो अध्वरस्य होतः" (ऋ० ६/१५/१४) इति। (अत्रकेचितु तिष्ठन्त एव स्विष्टकृतं जुह्वति। केचित् तद् वैकल्पिकं मन्यन्ते। यथाभावं तदनुष्ठेयम्)

(१४)

"इध्मसन्नहनहवनम्"–या इध्मसन्नहनार्थं निर्मिता रज्जुः तस्याः हवनमपि समन्त्रकमेव भवति रूद्रदैवत्यम् । "कद्रुद्राय प्रचेतसे (ऋ० १/४३/१) इति मन्त्रेण।

अमन्त्रकहवनस्य अवैदिकत्वात् अयज्ञीयत्वाच्च तन्निषेधः श्रूयते फलश्रुतौ तत्परिशिष्टे ।

"अमन्त्रमन्त्रं यत्किञ्चिध्दूयते च हुताशने ।"

"संवत्सरकृतं पापं तत्पावमानीभिरहं पुनामि" ।

इति (ऋ० ९/६७–सूक्तान्ते)।

(१५)

"प्रायश्चित्ताहुतयः"–यज्ञीये कर्मणि मन्त्राणां उच्चारणे 'सम्भूतानां' स्वरवर्णादि लोपदोषाणां निवृत्तये, देवतानां व्यत्यये, दोपाणां निवृत्तये हविषां न्यूनातिरेकादिदोषे, ऋत्विजामपि अपराधे, यजमानस्य व्रतादिलोपे च तत्समानता सम्पत्तये प्रायश्चित्ताहुतयो विधीयन्ते । तत्र 'अतोदेवाः' इदं विष्णुः" इत्यादयः षण्मन्त्राः दर्शिताः । अस्मिन् यज्ञे इन्द्रस्यैव प्राधान्यात् इन्द्रदैवत्यैव सा प्रायश्चिताहुतिरपि विशिष्टा युक्ततरेति च प्रतीयते । तस्मादन्ते सर्वतस्त्राणानार्थं "त्रातारमिन्द्रम्" इति मन्त्रेण एका प्रायश्चित्ताहुतिरधिका विशिष्टा विधीयते ।

बृहत्कल्पे तु "इन्द्रः सुत्रामा स्ववाँ अवोभिः" । "तस्यवयं सुमतौ यज्ञियस्य" इति अधिकं मन्त्रद्वयं संगृहीतम् । अत्रापि तद् गृहीतुं शक्यं युक्ततरं चेति प्रतीयते ।

(१६)

"सर्वप्रायश्चित्तानि" – त्रयाणां वेदानां न्यूनातिरेके तन्मंत्राणां तत्कर्मणां च समानतार्थं तत्सारभूताभिः

तिसृभिर्याहृतिभिः व्यस्ताभिः समस्ताभिश्चतस्रः आज्याहुतीर्जुहुयात्। इति विशेषः।

(१७)

"ब्रह्मप्रायश्चित्तानि"– सर्वस्यापि यज्ञस्य साक्षी, सर्वेषां ऋत्विजां नेता च ब्रह्मैव भवति। तस्मात् तेषामृत्विजादीनां मन्त्रस्वर–वर्णादिलोपे, हवनादिकर्मणां न्यूनातिरेकाद्यपराधे च ब्रह्मैव प्रायश्चित्तार्हो भवति। तदर्थं तदपराधनिवृत्तये (आद्याभ्यां–वैष्णवीभ्यामृग्भ्यां) व्याहृतिभिरेव वा ब्रह्मैव ताः प्रायश्चित्ताहुतीः जुहुयात्। इति यज्ञियं तत्वम्।

(१८)

"पूर्णाहुतिः"– अन्ते यज्ञस्य पूर्णतायै पूर्णाहुतिं जुहूयात्। (ऋ० ४/५८/१–११) "समुद्रादूर्मिर्मधुमान्" इति सूक्तेन एकादशर्चेन। "धामन् ते विश्वं भुवनमधिश्रितं" इति तत्सूक्तान्तया एकयैव ऋचा वा अजस्रधारया सा पूर्णाहुतिः सम्पद्यते।

(१९)

"संस्रावहवनम्" – पूर्णाहुतेरनन्तरं अन्ततः ये घृतबिन्दवः स्रवन्ति स संस्रावः, तत्संस्राव भाजः विश्वेदेवाः, तस्मात् तेभ्यः तत्संस्रावं जुहुयात्। "विज्योतिषा" इति मन्त्रेण (ऋ० ५/२/९) अत्र तिष्ठन्नेव पूर्णाहुतिम् जुहुयात्।

(२०)

"पूर्णपात्रनिनयनम्" – तत्र प्रणीतापात्रस्थजलाभिमन्त्रणम्– "आपः पृणीत भेषजम् (ऋ० १/२३/२१) इति मन्त्रेण। सविता पश्चातात् (ऋ० १०/३६/१४) इति तत्सेचनं सर्वतो दिक्षु, "आपो अस्मान् मातरः शुन्धयन्तु" (ऋ० १०/१७/१०) इति शिरसि मार्जनम्। इदमापः प्रवहत्, आपो अद्यान्वचारिषम् (ऋ० १/२३/२२–२३) इति पत्न्याः अज्जलौ (तदभावे स्वाज्जलौ वा) तज्जलमापूर्य तेनैवाभिषिञ्चेत्। सोऽयमेव यज्ञान्ते अवभृथः।

(२१)

"उपस्थानम्"– तदिदं तिष्टन्नेव कुर्यात् "अग्नेत्वं नः" (ऋ० ५/२४/१–४) इति चतसृभिः ऋग्भिर्द्विपदाभिः अग्निं उपतिष्ठेत यजमानः।

(२२)

"प्रदक्षिणा"–अभिवादनादिकं समन्त्रकमेव कार्यम् "त्वमग्ने प्रयतदक्षिणं नरं (ऋ० १/३१/१५) जातवेदसे सुनवाम सोमं। (ऋ० १/९९/१); अग्नेनय सुपथा राये अस्मान् (ऋ०१८९–१) इति त्रिभिर्मन्त्रैः प्रदक्षिणत्रयं कुर्यात्।

(२३)

विभूतिधारणम्–मानस्तोके, त्र्यम्बकं यजामहे इति मन्त्राभ्यां कार्यम्।

(२४)

"ब्रह्मणे दक्षिणादानम्" – "दक्षिणाश्वं दक्षिणा गां ददाति" (ऋ० १०/१०७/७) इति मंत्रेण कुर्यात्।

(२५)

"ब्रह्मणः उत्थापनम्"– "उत्तिष्ठ ब्रह्मणस्पते" (ऋ० १/४०/१) इति मन्त्रेण ब्रह्माणं विसृज्य उत्थापयेत्॥

(२६)

"अग्नेः स्वस्थानं प्रति प्रेषणम्" –"यज्जातवेदः" (ऋ० १०/८८/५) इति मन्त्रेण तदभ्यर्थना॥

(२७)

"इन्द्राय यज्ञ समर्पणम्" – यदद्य कच्चवृत्रहन् (ऋ० ८/९३/४) इति मन्त्रेण, अन्ते गोत्राभिवादनम्।

(२८)

"गोग्रासदानम्" – "आगावो अग्मन्" (ऋ० ६/२८/१) इन्द्रो यज्वने०, गावो भगो०, यूयं गावो मेदयथाकृशंचित्। इति चतुर्भिर्मन्त्रैः गोभ्यो ग्रासं समर्पयेत्।

(२९)

"ब्राह्मण पूजनम्"–नमो महद्भ्यः (ऋ० १/२७/१३) इति मन्त्रेण।

(३०)

"सुवासिनी पूजनं" – "इमा नारीरविधवाः सुपत्नीः" (ऋ० १०/१८/७) संहोत्रं स्म पुरानारी" (ऋ० १०/८६/१०) इन्द्राणीमासु नारिषु" इति मन्त्रैः ।

(३१)

"सन्तर्पणम्" सर्वेभ्यो भोजनं दद्यात् ।

(३२)

दक्षिणा–सर्वेभ्यो यथाशक्ति दक्षिणां दद्यात् ।

॥ यज्ञस्य त्रिविधं अनुष्ठानम् ॥

(१)

"यजमानः"–एव एकाकी यः स्वयं यजते स प्रथमः प्रधानः कल्पः ॥

(२)

ऋत्विग्भिः सह यजनं– द्वितीयं तत् मध्यमम् ।

(३)

ऋत्विग्भिरेव याजनं– तत् तृतीयं कनिष्टम् । अत्र यजमान एव स्वयं सर्वमेतद् विज्ञाय, मंत्रानधीत्य च श्रद्धया युक्तः सपत्नीकः गृहमेधी (अपत्नीकोऽपि) यदि यज्ञं यजेत

तर्हि तदेव मुख्यं इति सर्ववेदशास्त्रसिद्धान्तः, तदसम्भवे तत्र अशक्तौ च ऋत्विग्भिः सह यष्टुं, तैरेव वा याजयितुं च शक्यम् । इति विशेषः ।

॥ यज्ञियं हविः ॥

अस्मिन घृतमेव प्रधानं हविः । तच्च गव्यमेव प्रशस्तम् "गवि देवासौ घृतमन्वविन्दन्" (ऋ० ४/५८/४) इति तदनुश्रवणात् । सर्वत्रापि तत् समान, सर्वाभितं च । तथा स्वस्वाभीष्टार्थसिद्धये शास्त्रविहितानि अन्यान्यपि हवी ँ षि गृहीतुं शक्यं ।

तथैव "गव्यं दुग्धं सोम दैवत्यं गव्यं दधि इन्द्रदैवत्यं" तथा पञ्चगव्यं च हविर्भवति, दूर्वा– बिल्वपत्राणि, यज्ञीयवृक्षाणां समिधः, शमी–बिल्व–पलाश–अश्वत्थ–औदुम्बरादयः यज्ञीयवृक्षाः ॥

व्रीहि–यव तिल–गोधूमादीनि धान्यानि, तानि पृथग्वा मिश्रितानि वा हवी ँषि भवन्ति । चरूः, पायसम्, च घृतपक्वं, हविर्भवति । तान्येतानि स्वस्वाभीष्टविशिष्टकामनादिसिद्धये होतुं शक्यम् ॥

॥ यज्ञियं व्रतम् ॥

सर्वेष्वपि यज्ञेषु यज्ञियं दीक्षाव्रतमेवपूर्वं प्रथमाङ्गं भवति । इन्द्रयज्ञस्य बृहत्कल्पे सप्तमर्यादानियतानि सप्तमहाव्रतानि सन्ति निर्दिष्टानि । तानि च (१) सत्यव्रतं, (२) अहिंसा व्रतं, (३) अशनानशनव्रतम्," (४) ब्रह्मचर्यव्रतम्, (५) जागरणव्रतम्, (६) शुचिव्रतम्, (७) सौमनस्यव्रतम् "इति विहितानि यथाशक्ति पालयेत्" । अस्मिन् कल्पे इदं एकदिनसाध्यमेव यजनं अनेकदिन मप्यनुवर्तयितुं शक्यम् ।

बृहत्कल्पेतु त्रिदिनं, चतुर्दिनं, पञ्चदिनं वा तन्मन्त्राणां विभागेन अनुष्ठातुं युक्तम् । बहूनामृत्विजां योगेन एकस्मिन्नेवदिने निर्वर्तयितुमपि शक्यम् । इति विशेषः । यावद् यज्ञः प्रवर्तते तावत् पर्यन्तं व्रतानुष्ठानमपि अनिवार्यमेव ।

॥ विशेषनिवेदनं ॥

(१) अत्र अग्निमुखादिषु तथा प्रधानयजनादिषु च केवलाः ऋङ्मन्त्राः एव विनियोगार्थं संगृहीताः । तथापि स्वस्वभावनानुसारेण याजुषादीन् स्वस्वशाखोक्तमन्त्रान् अपि गृहीतुमर्हन्ति तत्तद्वेदिनः । इति विशेषः ।

(२) तथैव अनेनकल्पेन अग्निमुखान्तमनुष्ठाय गाणपत्ये प्रधाने यजने ब्रह्मणस्पतिसूक्तमन्त्राः, शक्तियजने वाग्दैवत्यसूक्तमन्त्राः, उषोदैवत्यसूक्तमन्त्राश्च ग्राह्याः ।

विष्णुयजने विष्णुदैवत्यमन्त्राः, रूद्रयजने रूद्रदैवत्याः ग्राह्याः । सोमयजने पवमानमण्डलान्तर्गताः, आर्षेययजने वसिष्ठ–विश्वामित्रादिमण्डलान्तर्गताः सर्वेऽपि मन्त्राः ग्राह्याः । समग्रणोदयज्ञे तु बृहत्कल्पोक्तविधानेन सर्वं अग्निमुखादिकमनुतिष्ठेत् ।

(३)

यज्ञान्ते अन्नशुध्यर्थं वैश्वदेवादिकं कुर्यात् । तथा गोग्रासदानं च, ततः यज्ञाङ्गभूतं सर्वप्राणितृप्त्यर्थं भोजनमुखेन सर्वेषां सन्तर्पणमपि यथाशक्ति कुर्यात् । तदपि एकं यज्ञाङ्गमेव, स एव अतिथियज्ञः मनुष्ययज्ञः भूतयज्ञः इति च प्रसिद्धः ।

(४)

दक्षिणा–दक्षिणान्ता एव सर्वे यज्ञा भवन्ति । तस्माद् भोजनोत्तरं सर्वेभ्यः बटुभ्यः ऋत्विग्भ्यः ब्राह्मणेभ्यः महाजनेभ्यः स्त्रीभ्यः सुवासिनीभ्यः कुमारीभ्यश्च यथाशक्ति दक्षिणां समर्पयेत् । न तु अदक्षिणो यज्ञो भवति । सदक्षिण एव सर्वोयज्ञः समृध्यते । सर्वसमृध्यै प्रभवति ।

तत एव यज्ञपत्नी यजमानश्च यज्ञशेषं भुज्जीयाताम् ।

॥ इन्द्रयजने किञ्चिदितिवृत्तम् ॥

“तत्रभवान् वासिष्ठः” स्वयम्प्रज्ञः काव्यकण्ठे महाकविः महान् तपस्वी च सन्–भारतीयानां समुद्धरणाय भारतहिताय च दिव्यां विभूतिं काञ्चित परां शक्तिं च (सम्पादयितुं तत्र तत्र पवित्रेषु क्षेत्रेषु तपश्चरन् समग्रं आयुः क्षपयामास। इति विदित चरमेव सर्वेषाम्। अरुणाचले, पडवेट्–रेणुकाक्षेत्रे गोकर्णे उमामहेश्वरोपवने, अशोकावने, चन्द्रगिरौ, महेन्द्रपर्वते, अन्यत्रापिशिरसि आनन्दाश्रमादौ च तत् तपश्चरितमपि प्रसिद्धतरमेव, तत्र केषाञ्चित् तान्त्रिकमन्त्राणामपि जपादिना बहुधा तपः संवृत्तमपि जानयन्त्येव बहवो भक्तजनाः।

अथ गोकर्णे ऋग्वेदमन्त्रार्थ विमर्शनिन तत्र महता अनुभा वेन समर्थितस्य पारमैश्वर्यपूर्णस्य भगवतः “इन्द्रस्यैव” श्रेष्ठत्वं “इन्द्रयाजनस्यैव” परमं श्रेयस्त्वं, श्रेयो–निःश्रेयसात्मकपरमार्थपरत्वं, विश्वशान्तिशक्ति–विभूतिप्रदत्वम्, विश्वविजयादि–सिद्धिप्रदत्वं विश्वशान्ति प्रतिष्ठादि सामर्थ्यं च अस्तीति महतादीर्घेण तपसा सन्दर्श, ततश्च महेन्द्रपर्वते आवयोरूभयोरेव सेव्यसेवकयोः गुरू–शिष्ययोः अकस्मात् यदृच्छयैव संघटितेन योगेन “श्रीगोकर्णेश्वरसन्निधौ श्रीभार्गवरामस्य तपोवने सम्प्रवृत्ते तपसि तस्मिन् “महेन्द्रे” परमा श्रद्धा सुदृढा च समभ्युदियाय। ततश्चतदिन्द्रियजनेन

स्वाभीष्टार्थ सिद्धये विश्वकल्याणादिसमृद्धये च ऋग्वेदात् प्रधानानि प्रकृष्टार्थ विशिष्टानि सूक्तानि सङ्गृह्य, तैरेव वाग्यज्ञरूपेण जपयज्ञेन तमिन्द्रमाराधयामास वासिष्ठः ।

"यजाम देवान् यदि शक्नवाम मा ज्यायसः शंसमावृक्षिदेवाः" इति (ऋ० १/२७/१३) मन्त्रवर्णोपदिष्टेन आन्तर्येण वाग्यज्ञेनैव सर्वं सेत्स्यतीति निश्चिकाय । तथाऽपि बाह्यानां सिद्धये बाह्यो हविर्यज्ञ एव आवश्यकः प्रधान इति च तत्र परां निष्ठामाससाद, तदेव स्पष्टं समर्थयामास भवान् वासिष्ठः - यदि ऋग्वेदस्थाभिः सर्वाभिरपि ऋग्भिः इन्द्रं यष्टुं शक्येत्तर्हि-तदेव महते योगाय इन्द-शक्तेरभ्भुदयाय कल्पेतेति । तदेव भवान् अप्रयाणं भक्तेभ्यः उपादिदेश, इति तदिदमनावृतं तद्वचनं" अस्तु ।

सत्यमेवैतद्भूत्, सत्यमन्त्र एव भवान् तपसैव समृद्धः, स्वयं तपसैवनित्यं जागर्ति, तद्वचनेनैव "इन्द्र यज्ञकल्पोऽयमुदगात् । तस्मात् तदेतदेवमन्येतत्परिचर्यादि सार्थकताम् । भवदनुग्रहोदितं पूर्णं फलं भावयामि" तद्वचनमेव शिरसा सन्धृतं सत् एतावते महते फलाय अकल्पत इति महदिदं मे प्रहर्षास्पदम् । तदुपदेशानुसारेण तन्मार्गदर्शनमवलम्ब्यैव इमं "इन्द्रयज्ञकल्पं" व्यरचिषम् "तत्परितुष्टये इन्द्राराधनार्थं" तस्मिन् बृहत्कल्पे ऋग्वेदस्थाः सर्वा अपि इन्द्रदैवत्याः ऋचः संगृहीताः यजनार्थं

(३२१०) मन्त्राः सन्ति। तदपि विस्तरशः यथावकाशं प्रकाशयितुं अनुष्ठातुं, तथा अनुष्ठापयितुं च सोऽयमस्मि सन्नद्धः तदपि गुरोरेवानुग्रहेण अचिरादेव सेत्स्यतीति भूयान् अस्ति मे महान् आत्मविश्वासः।

अथ प्रस्तुतेऽस्मिन् कल्पे वासिष्ठोपदिष्टाः प्राधान्येन तदभिमता एव केचिन्मन्त्राः संगृहीताः ॥ श्रीवासिष्ठमुनेर्महाप्रस्थानानन्तरं तत्स्मरणार्थं तदाराधनार्थं च भवतः जन्मदिने कार्तिके कृष्णे अष्टम्यां तिथौ प्रतिसंवत्सरं "श्रीवासिष्ठजयन्तीमहोत्सवं" निर्वर्तयन्ति तत्र तत्र निवसन्तो भक्तजनाः इति सुप्रसिद्धमेव।

गोकर्ण मण्डलान्तर्गते शिरसि कुळवे ग्रामे तत्पादुकासन्निधौ तन्महोत्सवे वासिष्ठप्रीत्यर्थं तदभीष्ट परमं प्रियं "इन्द्रयजनं" यथाकथञ्चित् येन केनापि विधानेन अद्यावत् अनुतिष्ठन्ति, अस्मदीयाः भवदीयाः भक्तजनाः। तथा अन्यत्रापि कञ्चीकायिग्रामे वासिष्ठस्मरणार्थं इन्द्रयजनं अनुष्ठीयते ॥ तत्र केवलेन वैदिकेन विधानेन तदिन्द्रयजनं यष्टुं संक्षेपतः इमं कल्पमकल्पयम्।

अस्मिन् वासिष्ठोपदिष्टमन्त्राणां संग्रहानन्तरं एतल्लेखन समये वाराणास्यां भागीरथी तीरे भाद्रपदे शुक्ले श्रीगणपति चतुर्थ्यां भृगुवासरे अकस्मादेव श्रीवासिष्ठमुखादेव ध्वनितमिव

संश्रुतं "दिवोगभस्तिः" "अक्रमिष्ट" । इति मन्त्रद्वयमपि संग्राह्यमिति । तदनुरोधेन यथादिष्टमेव संगृहीते प्रधानयजने विनियोगार्थम् । तस्माद् यथाभाव तदिदं गृहीतुमनुष्ठातुमर्हन्ति भवन्तः । इत्यादि विज्ञापयिता भवदीयो–

भाद्रपद पूर्णिमा
सोमवार शके १८८२

वासिष्ठान्तेवासी
दैवरातः

[सम्पूर्णेयं भूमिका]

ह्रीं ॐ श्रीः

इन्द्रयज्ञः

* प्रारभ्यते *

ॐ श्रीः

॥ इन्द्रयज्ञः ॥

* श्रीवासिष्ठोपदिष्टमन्त्रकल्पः *

॥ तत्प्रयोगः ॥

ॐ भद्रं नो अपि वातय मनः । ॐ शान्तिः, शान्तिः, शान्तिः ।

"इन्द्र इति ब्रवीतन" "इन्द्रो विश्वस्य राजति" ।

"इन्द्रं" यष्टकामः प्रातरेव ब्राह्मे मुहूर्ते सुस्नातः शुचिर्भूतः सन् सन्ध्योपासनादिकं नित्यं वैदिकं कर्म समाप्य, इन्द्रयजनार्थं सहश्रद्धया सपत्नीको यजमानः तद् देवयजनं उत्तरया द्वारा प्रविश्य वेदेः पश्चिमतः ऐन्द्रीं दिशममिमुखस्तिष्ठन्, उद्यन्तमादित्यं प्रतिपश्यन्, तदन्तरात्मानं तं परमं पुरूषं तमन्तर्यामिणं इन्द्रमेव समनुध्यायन्, धीमिरेवान्तरनुसन्दधानः, मनसा शिरसा हस्ताभ्यां सह वाचा प्राणेन प्रणमन्, अनया ऋचा "यदद्य कच्च वृत्रहन्" इति विश्वस्याध्यक्षं तमिन्द्रमेव प्रथमतः प्रार्थयेत् । "यदद्य कच्च

वृत्रहन्" इति सुकक्ष आङ्गिरसः ऋषिः । इन्द्रो देवता । गायत्री छन्दः । इन्द्रप्रार्थने तदभिवादने च विनियोगः ॥

॥ इन्द्रप्रार्थना यज्ञ सङ्कल्पः ॥

ॐ यदद्य कच्च वृत्रहन्नुदगा अभिसूर्य ।

सर्वं तदिन्द्र ते वशे ॥ (ऋ. ८. ९३. ४ सा. १२६ अथर्व २०. ११२. १)

॥ यज्ञसङ्कल्पः ॥

यजमानः–इन्द्रयजनार्थं तस्यां देवयजनवेदिकायां दर्भादि पवित्रासने प्राङ्मुखः सन् उपविश्य, पवित्रार्थं कुशपवित्रं धृत्वा, अन्तर्बहिः शुध्यर्थं समन्त्रकं–आचमनं प्राणायामं च कृत्वा, देशकालौ संकीर्त्य, यज्ञियं संकल्पं कुर्यात् ॥

"श्रीमद्भगवतः परमपुरूषस्य पारमैश्वर्यादियोग परिपूर्णस्य महेन्द्रस्याज्ञया प्रवर्तमानस्य आद्यब्रह्मणो द्वितीयपरार्धे श्रीश्वेतवाराहकल्पे वैवस्वतमन्वन्तरे कलियुगे प्रथमे पादे जम्बुद्वीपे भरतखण्डे भारतेवर्षे महामेरोर्दक्षिणे पार्श्वे गोदावर्याः दक्षिणे तीरे शालिवाहनशके गोकर्णमण्डले गोराष्ट्रदेशे भार्गवक्षेत्रे सह्यपर्वतोपान्ते "श्रीमहेन्द्र देवतासन्निधौ, अस्मिन् वर्तमानकालव्यावहारिके (एतदन्तं उक्त्वा) संवत्सरं, अयनं,

ऋतुं, मासं, पक्षं, तिथिं, वासरं, नक्षत्रं च उच्चार्य, अद्य एवंगुण विशेषण विशिष्टायां शुभपुण्यतिथौ,–श्रीमहेन्द्रप्रीत्यर्थं, मम उपात्त सर्वदुरितक्षयद्वारा श्रीयज्ञपुरूषप्रसादसिध्यर्थं, अस्माकं सकुटुम्बानां सपरिवारणां सराष्ट्रीयाणां सर्वेषां जनानां,–क्षेमस्थैर्य शुभाभयायुष्यारोग्यैश्वर्यानन्दादियोगसिध्यर्थं, गो–भू–धन–धान्यादि सकल सम्पदभ्युदयार्थं श्रीमहेन्द्रप्रसादेन विश्वकल्याणसिध्यर्थं सत्त्वशुद्धिद्वारा अमृतत्वसिध्यर्थं इन्द्रयजनमहं करिष्ये ॥*॥

तन्निर्विघ्नतासिध्यर्थं श्रीगणपतिस्मरणं तदर्चनं च करिष्ये ॥ गणानां त्वा शौनको गृत्समदः ऋषिः । गणपतिर्देवता जगती छन्दः । गणपतेः स्मरणे तदर्चने च विनियोगः ॥

ॐ गणानां त्वा गणपतिं हवामहे कविं कवीना–
मुपमश्रवस्तमम् । ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत
आ नः श्रृणवन्नूतिभिः सीद सादनम् ॥ (ऋ. २.३२.१)

---

* मंत्र सङ्कल्पः एकदेशीयः कल्पितः तत्तद्देशकालादिकं ग्राह्यं तथा इष्टसिध्यादिविषये तदुद्देशे यथेष्टं न्यूनं अधिकं च कर्तुं शक्यम् ।

अत्र सर्वत्रापि वेदमन्त्राणां विनियोगे "ऋषिदैवत–छन्दसां" उच्चारणनियमेऽपि तस्य वैकल्पिकत्वात् यथाशयं यथाभावमनुष्ठेयम् ॥

॥ अग्निप्रतिष्ठापनम् ॥

॥ अथ अग्निमुखम् ॥

मृद्गोमयादिभिः परिशुद्धे षड्भिः नवभिर्वा रेखाभिः संस्कृते तिसृभिर्मेखलाभिः निर्मिते कुण्डे स्थण्डिले वा अग्निं प्रतिष्ठापयेत्। सुवासिन्या आनीतमग्निं स्थण्डिलादाग्नेय्यांदिशि निधापयेत् ॥

इन्द्रयजनार्थं अग्निप्रतिष्ठापनमहं करिष्ये, "अग्निं दूतं पुरोदधे" इति विरूपः आङ्गिरस ऋषिः अग्निर्देवता गायत्री छन्दः। अग्निप्रतिष्ठापने विनियोगः।

ॐ अग्निं दूतं पुरो दधे हव्यवाह मुप ब्रुवे।

देवाँ आसादयादिह ॥

"ॐ भूर्भुवः स्वः" अग्निं प्रतिष्ठापयामि।

॥ अग्नेरावाहनम् ॥

ऋषिः। अग्निर्देवता। "जुष्टोदमूना" आत्रेयो वसुश्रुतः त्रिष्टुप् छन्दः। "एह्यग्ने" राहूगणो गोतमः ऋषिः। अग्निर्देवता। त्रिष्टुप् छन्दः। अग्न्यावाहने विनियोगः।

ॐ जुष्टो दमूना अतिथिर्दुरोण इमं नो यज्ञमुपयाहि विद्वान्।

विश्वा अग्ने अभियुजो विहत्या शत्रूयतामाभरा भोजनानि।

ॐ एह्यग्न इह होता निषीदादब्धः सु पुरएता भवाः नः॥

अवतां त्वा रोदसी विश्वमिन्वे यजामहे सौमनसाय देवान्॥

(ततः अग्नेः परिसमूहनम्। पर्युक्षणं च कृत्वाचतुर्दिक्षु परिस्तरणं आस्तृणीयात्)

[अन्वाधानम्]

समिद्द्वयमादाय "अस्मिन् अन्वाहितेऽग्नौ जातवेदसमग्निमि ध्मेन प्रजापतिं प्रजापतिं च आधारदेवते आज्येन अग्नीषोमौ चक्षुषी आज्येन, सवितारं अग्निं अग्निं इषं आपश्च पूर्वाङ्गदेवताः, अत्र प्रधानं-गायत्रीमन्त्रेण सवितारमष्टोत्तरशतवारं, अग्निं इन्द्रं पुनरिन्द्रं च अष्टोत्तरशतवारं, पुनः चतुभिर्मन्त्रैरिन्द्रं, इन्द्राणीं, जातवेदसमग्निं, त्र्यम्बकं रूद्रं,

वैश्वानरं, विष्णुं, अग्निं च प्रत्येकमष्टवारं एताः प्रधानदेवताः, दुर्गां नववारं, सञ्ज्ञानं चतुर्वारं, उत्तराङ्गदैवतं चाज्येन, शेषेण स्विष्टकृतमग्निं, इध्मसन्नहनेन रूद्रं, देवान्, विष्णुं, अग्निं, मरूतः अग्निं, वरूणं, इन्द्रं च अग्निं, वायुं, सूर्यं, प्रजापतिं च एताः प्रायश्चित्तदेवताः, अग्निं, विश्वान् देवान् संस्त्रावेण यक्ष्ये, ता एता अङ्गदेवताः प्रधानदेवताः ताः सर्वाः अत्र सन्निहिताः सन्तु, एवं साङ्गोपाङ्गेन कर्मणा सद्यो यक्ष्ये। समस्तव्याहृतीनां परमेष्टी प्रजापति प्रजापतिर्बृहती अन्वाधानसमिद्धोमे विनियोगः ॥

ॐ भूर्भुवः स्वः स्वाहा। प्रजापतय इदं न मम। *

॥ ब्रह्मप्रतिष्ठा ॥

यज्ञप्रणयनार्थं ब्रह्माणं यज्ञसाक्षिणं इन्द्रं ब्रह्मणस्पतिस्वरूपं अग्नेर्दक्षिणतः प्रतिष्ठापयेत्। निषुसीद गणपते, "अभिख्या नो मघवन्" इति द्वयोः वैरूपो नभः प्रभेदनः ऋषिः। इन्द्रो देवता। त्रिष्टुप् छन्दः, ब्रह्मप्रतिष्ठापने–तत्प्रार्थने च विनियोगः।

---

* एतदन्वाधानं केचिद् ऐच्छिकं वैकल्पिकं मन्यन्ते तस्माद् यथा सौकर्यमनुष्ठेयम् ॥

ॐ नि षु सीद गणपते गणेषु त्वामाहुर्विप्रतमं कवीनाम्।

न ऋते त्वत् क्रियते किञ्चनारे महामर्कं मघवञ्चित्रमर्च ॥

ॐ अभिख्या नो मघवन् नाधमानान् सखे बोधि

वसुपते सखीनाम्। रणं कृधि रणकृत् सत्यशुष्माऽ भक्ते

चिदा भजा राये अस्मान् ॥

॥ पात्रासादनम् ॥

अग्नेरुत्तरतः दर्भेषु यज्ञियपात्राणि न्युब्जानि समासादयेत् "प्रोक्षणी–स्रुवौ प्रणीता–आज्यपात्रे, इध्मा–बर्हिषी" इति एतानि प्राक्संस्थाक्रमेण।

[अपां प्रणयनम्]

("यज्ञे ब्रह्मानुज्ञया यज्ञियपात्रादीनां हविर्द्रव्यादीनां प्रोक्षणार्थं, सर्ववस्तूनां पवित्रीकरणार्थं, अवभृथाभिषेकार्थं च अपः प्रणयेत्") आपोहिष्ठेति ऋचा तृचेन वा।

"आपोहिष्ठा" इति आम्बरीषः सिन्धुद्वीपः ऋषिः । आपो देवताः । गायत्री छन्दः । अपां प्रणयने विनियोगः ।

"ॐ आपो हि ष्ठा मयो भुवस्ता न ऊर्जे दधातन ।

महे रणाय चक्षसे ॥"

ततो यजमानः प्रोक्षणीपात्रं अग्नेः पश्चिमतः निधाय तदुपरि प्रागग्रे उदगग्रे वा पवित्रे निधाय तस्मिन् अपः पूरयित्वा पवित्रेण उत्पूय तानि यज्ञियपात्राण्युत्तानानि कृत्वा इध्मं च विस्रस्य सर्वाणि पात्राणि त्रिःप्रोक्षेत् ।

ततः प्रणीतापात्रे ता अपः सम्पूर्य तत् पात्रमग्नेः उत्तरतः संस्थाप्य ते पवित्रे गृहीत्वा अन्यैर्दर्भैः आच्छादयेत् ॥

॥ आज्यसंस्कारः ॥

ततस्ते पवित्रे आज्यपात्रे निधाय, तत्पात्रं पुरतः संस्थाप्य, तस्मिन् आज्यमासिच्य, अग्नेरूत्तरतः स्थितानङ्गारान् भस्मनासह परिस्तरणाद् बहिर्गृहीत्वा तेषु आज्यपात्रं अधिश्रित्य, ज्वलता दर्भोल्मुकेनावज्वल्य, आज्यशुध्यर्थं प्रक्षालितं दर्भाग्रद्वयमाज्ये प्रक्षिप्य, पुनर्ज्वलता दर्भोल्मुकेन तदाज्यं त्रिः पर्यग्निकृत्वा, तत्पवित्रेण आज्यं त्रिरूत्पूय, तत् पवित्रमग्नौ प्रहरेत् ॥

"यत् ते पवित्रमर्चिषि" इति वसिष्ठः ऋषिः । पवमानसोमो देवता । गायत्री छन्दः । आज्योत्पवने विनियोगः ।

ॐ यत्ते पवित्रमर्चिषि । अग्ने विततमन्तरा
ब्रह्म तेन पुनीहि नः ॥

ततः आत्मनः अग्रतो भूमिं प्रोक्ष्य, तत्र बर्हिः सन्नहनीं रज्जुमुदगग्रां प्रसार्य, तस्यां बर्हिरास्तीर्य, तस्मिन् आज्यपात्रं निधाय स्त्रुवेण जुहुयात् ॥

अत्र "समिद्–दूर्वा–तिल–व्रीहि–यव–पायसादीनि द्रव्याण्यपि स्वस्वकामानुसारेण गृहीतुं शक्यम् । तानि च ऋत्विग्भिरपि होतुं शक्यं, तानि हवी ँ षि हवनार्थं घृतेन अभिघारयेत् ॥

॥ अग्निध्यानम् ॥

चत्वारि श्रृङ्गा गौतमो वामदेवः ऋषिः । अग्निर्देवता । त्रिष्टुप् छन्दः । अग्निमूर्तिध्याने विनियोगः ॥

ॐ चत्वारि श्रृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त
हस्तासो अस्य । त्रिधा बद्धो वृषभो रोरवीति
महो देवो मर्त्या ँ आविवेश ॥

* "विश्वानि नः" इति तिसृणामात्रेयो वसुश्रुतः ऋषिः । अग्निः देवता । त्रिष्टुप् छन्दः। अग्न्यर्चने प्रार्थने च विनियोगः ।

ॐ विश्वानि नो दुर्गहा जातवेदः, सिन्धुं न नावा दुरिताऽति पर्षि । अग्ने अत्रिवन् नमसा गृणानः, अस्माकं बोध्यविता तनूनाम् ॥१॥ (५-४-९)

ॐ यस्त्वा हृदा कीरिणा मन्यमानः, अमर्त्यं मर्त्यो जोहवीमि । जातवेदो यशो अस्मासु धेहि, प्रजाभिरग्ने अमृतत्वमश्याम् ॥ (५-४-१०)

ॐ यस्मै त्वं सुकृते जातवेद उ लोकमग्ने कृणवः स्योनम् । अश्विनं स पुत्रिणं वीरवन्तं गोमन्तं रयिं नशते स्वस्ति ॥ (५-४-१०)

---

* अत्र "ऋषिः देवता, छन्दः" इति मन्त्राणां पूर्वं वक्तव्यम् । तथाऽपि तेषां नाममात्रं लिखितमस्ति ।

॥ वेदेरलंकरणम् ॥

"अरं कृण्वन्तु वेदिमिति अगस्त्यो मैत्रावरूणिः ऋषिः । इन्द्रो देवता । अनुष्टुप् छन्दः । वेदेरलङ्करणे विनियोगः ॥

"ॐ अरङ्कृण्वन्तु वेदिं समग्निमिन्धतां पूराः ।

तत्रामृतस्य चेतनं यज्ञं ते तनवावहै ॥

[इध्महवनन्]

ततः ब्रह्माणं, इध्मं आत्मानं च अलंकृत्य हस्तं प्रक्षाल्य, इध्मबन्धनरज्जुमिध्मस्थाने निधाय पाणिनेध्ममादाय, मूलमध्याग्रेषु स्त्रुवेणत्रिरभिधार्य, मूलमध्ययोर्मध्यभागे गृहीत्वा जुहुयात् ।

"समिधा जातवेदस" इति मैत्रावरूणिर्वसिष्ठः ऋषिः । अग्निः देवता । बृहती छन्दः ॥ इध्महवने विनियोगः ॥

ॐ समिधा जातवेदसे देवाय देवहूतिभिः । हविर्भिः

शुक्रशोचिषे नमस्विनो वयं दाशेमाग्नये स्वाहा । इध्माय

जातवेदसेऽग्नय इदं न मम । (७-१४-१)

टिप्पणी–सोऽयं अग्नेः कवचाङ्ग सिध्यर्थकः । सर्वबाधाप्रतिबन्धनसमर्थः । आत्मरक्षार्थकः ॥

॥ आघारहोमः ॥

"प्रजापते" इति हिरण्यगर्भः ऋषिः । प्रजापतिर्देवता । त्रिष्टुप् छन्दः । आघारहोमे विनियोगः ॥

"ॐ प्रजापते नत्वदेतान्यन्यो विश्वा जातानि परि ता बभूव यत्कामास्ते जुहुमस्तन्नो अस्तु वयं स्याम पतयो रयीणां स्वाहा ॥

"ॐ प्रजापते० रयीणां स्वाहा" प्रजापतय इदं न मम ॥

प्रदीप्ते इध्मे उपांशु जपेन इध्मोपरि वायव्यकोणमारभ्य आग्नेयकोणपर्यन्तं सन्ततधारया प्रजाप्रतिदैवत्या प्रथमा आहुतिः, निऋतिकोणमारभ्य ईशानकोणपर्यान्तं द्वितीया आहुतिः ॥

टिप्पणी – अग्नीषोमावज्यभागौ । चक्षुषी वार्त्राघ्नावाज्यभागौ भवतः । अग्नौ उत्तरतः अग्निः । दक्षिणतः सोमः ॥ सोऽयं चक्षुषोः होमः अग्नेः साक्षित्वसिद्धये दृक्छक्तिसम्पादकः । स च ज्ञानप्रधानस्य इन्द्रात्मनस्तस्य क्रियेच्छात्मकशक्तिद्वय तत्त्वसामर्थ्यकः । वाङ्मनःसत्वसम्पादकः (अग्नीषोमदेवताकः) देव–पितृगण–संहित–स्वाहा–स्वधा सञ्ज्ञक वाक्छक्तिद्वय योगसंसाधकश्च भवितुमर्हति ।

तत्रापि अस्मिन् इन्द्रयज्ञे वार्त्रघ्नावेव तौ प्रधानौ तदर्थं वृत्रघ्न शब्द विशिष्टावेव मन्त्रौ विशिष्टौ ।

॥ चक्षुषोः होमः ॥

"अग्निर्वृत्राणि जङ्घनद्" इति वसुश्रुतः । आत्रेयः ऋषिः । अग्निर्देवता । गायत्री छन्दः । चक्षुषः आज्यभागहवने विनियोगः ॥

"ॐ अग्निर्वृत्राणि जङ्घनद् द्रविणस्यु र्विपन्यया । समिद्धः शुक्र आहुतः स्वाहा" अग्नय इदं न मम ॥ (ऋ ६. १६. ३४.)

"त्वं सोमासि सत्पतिः" इति गोतमों राहूगणः ऋषि । सोमो देवता । गायत्री छन्दः । चक्षुषः आज्यभागहवने विनियोगः ।

ॐ त्वं सोमासि सत्पतिस्त्वं राजोत वृत्रहा । त्वं भद्रो असि कृतुः स्वाहा" सोमायेदूं न मम ॥ (ऋ. १-९१-५)

॥ ऋत्विगभ्यर्थना ॥

"समिधाऽग्निं दुवस्यत" इति विरूपः आङ्गिरसः ऋषिः । अग्निर्देवता । गायत्री छन्दः । 'सुसमिद्धाय शोचिष' इति वसुश्रुत । आत्रेयः ऋषिः । अग्निर्देवता । गायत्री छन्दः । ऋत्विगभ्यर्थने विनियोगः ।

"ओं समिधाग्निं दुवस्यत घृतैर्बोधयतातिथिम्"।

आऽस्मिन् हव्या जुहोतन। (ऋ. ८.४४.१)

सु समिद्धाय शोचिषे घृतं तीव्रं जुहोतन।

अग्नये जातवेदसे॥ (ऋ. ५.५.१)

॥ अग्निप्रार्थना ॥

"तं त्वा समिद्भिराङ्गिरः" इति बार्हस्पत्यो भरद्वाजः ऋषिः। अग्निर्देवता। गायत्री छन्दः। अग्निप्रार्थने विनियोगः॥

तं त्वा समिद्भिरङ्गिरो घृतेन वर्धयामसि।

बृहच्छोचा यविष्ठ्य॥

टिप्पणी–एवं सर्वेष्वपि यज्ञेषु एतावदन्तं अग्निमुखं कृत्वा, ततः स्वं स्वमिष्टं दैवतं तत्तन्मन्त्रैर्हविर्भिश्च स्वेष्टैः यष्टुमर्हन्ति॥

॥ अथ पूर्वाङ्गहवनम् ॥

(१) "तत् सवितुर्वरेण्यम्" इति गाथिपुत्रो विश्वामित्रः ऋषिः । सविता देवता । गायत्री छन्दः । पूर्वाङ्गहवने विनियोगः ॥

ॐ भूर्भुवः स्वः" तत् सवितुर्वरेण्यं भर्गो देवस्य धीमहि । धियो यो नः प्रचोदयात्, स्वाहा ॥ सवित्रे इदं न मम ॥

(२) "अग्निमीळे पुरोहितम्" इति मधुश्छन्दा वैश्वामित्रः ऋषिः । अग्निर्देवता गायत्री छन्दः । पूर्वाङ्गहवने विनियोगः ॥

ॐ अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजम् ॥ होतारं रत्नधातमम् स्वाहा ॥ अग्नय इदं न मम ॥

(३) "इषे त्वोर्जेत्वेति" प्रजापतिः काण्डर्षिः इट् ऊर्क् च देवता यजुश्छन्दः । पूर्वाङ्गहवने विनियोगः ॥

ॐ इषे त्वोर्जे त्वा स्वाहा ॥ इषे ऊर्जे च इदं न मम ॥

अत्र इषेत्वोर्जेत्वा इति अस्याःस्थाने सम्पूर्णेन अनुवाकेनापि एकामाहुतिं होतुं शक्यम् ।

तथा अस्य पूर्वाङ्गहवनस्य ऐच्छिकत्वात् यथाभावं यथाशक्यमनुष्ठातुमर्हन्ति ।

(४) "अग्न आयाहि वीतय" इति बार्हस्पत्यो भरद्वाज ऋषिः अग्निर्देवता गायत्री छन्दः । पूर्वाङ्गहवने विनियोगः ॥

ॐ अग्न आयाहि वीतये गृणानो हव्यदातये ॥

नि होता सत्सि बर्हिषि स्वाहा" ॥

अग्नय इदं न मम ॥

(५) "शं नो देवी रभिष्टये" इति आम्बरीषः सिन्धुद्वीपः ऋषिः । आपो देवताः । गायत्री छन्दः । पूर्वाङ्गहवने विनियोगः ॥

ॐ शं नो देवीरभिष्टय आपो भवन्तु पीतये ॥

शं योरभि स्त्रवन्तु नः स्वाहा" ॥

अद्भ्य इदं न मम ॥

टिप्पणी–अत्र पूर्वाङ्ग हवने ब्रह्मयज्ञे इव प्रथमतः वेदमुखेन गायत्रीमन्त्रेण एकामाहुतिं जुहुयात् । ततः चतुर्णां वेदानां आदिमैः चतुर्भिमन्त्रैः चतस्रः आहुतीः जुहुयात् ॥ इति विशेषः

॥ अथ प्रधानयजनम् ॥

॥ श्री वासिष्ठेन उपदिष्टाः तदभीष्टाः मन्त्रः ॥

(१)

"तत् सवितुर्वरेण्यम्" इति विश्वामित्रः ऋषिः । सविता देवता । गायत्री छन्दः । प्रधानाज्य हवने विनियोगः ॥

ॐ तत् सवितुर्वरेण्यं भर्गो देवस्य धीमहि ।

धियो यो नः प्रचोदयात् स्वाहा । सवित्रे इदं न मम ॥

(१०८) अष्टोत्तरशताहुतीर्जुहुयात् ॥ (ऋ. ३, ६२, १०)

(२)

"वनेम पूर्वीः" इति शाक्त्यः पराशरः ऋषिः । अग्निर्देवता । द्विपदा विराट् छन्दः । प्रधानाज्यहवने विनियोगः ॥

ॐ वनेम पूर्वीरर्यो मनीषा अग्निः सुशोको विश्वान्यश्याः

स्वाहा । अग्नय इदं न मम ॥ (१०८) आहुतयः ।

(३)

"रायस्कामः" इति मैत्रावरूणिर्वसिष्ठ ऋषिः । इन्द्रो देवता । द्विपदा विराट् छन्दः । प्रधानाज्य हवने विनियोगः ॥

ॐ रायस्कामो वज्रहस्तं सुदक्षिणं पुत्रो न पितरं हुवे स्वाहा।

इन्द्रायेदं न मम। (१०८) आहुतयः ॥ (ऋ. ७.३२.३)

(४)

"इन्द्रो विश्वस्य राजति" इति वसिष्ठः ऋषिः। इन्द्रो देवता। एकपदा गायत्री छन्दः। प्रधानाज्यहवने विनियोगः ॥

ॐ इन्द्रो विश्वस्य राजति स्वाहा" इन्द्रायेदं न मम ॥

(१०८) आहुतयः ॥ (सामवेद)

(५)

"आ तू न इन्द्र" इति कुसीदी काण्व ऋषिः। इन्द्रो देवता। गायत्री छन्दः। प्रधानाज्यहवने विनियोगः ॥

ॐ आ तू न इन्द्र क्षुमन्तं चित्रं ग्राभं संगृभाय,

महाहस्ती दक्षिणेन स्वाहा। इन्द्रायेदं न मम ॥

(८) अष्टौ आहुतयः ॥ (ऋ. ८. ८.१.)

(६)

"इन्द्र श्रेष्ठानि" इति आङ्गिरसः गृत्समदः ऋषिः। इन्द्रो देवता त्रिष्टुप् छन्दः। प्रधानाज्यहवने विनियोगः ॥

ओ३म् इन्द्र श्रेष्ठानि द्रविणानि धेहि चित्तिं दक्षस्य सुभगत्वमस्मे। पोषं रयीणामरिष्टिं तनूनां स्वाद्मानं वाचः सुदिनत्वमह्नां स्वाहा॥ इन्द्रायेदं न मम॥

(८) आहुतयः॥ (ऋ. २.२१.६)

(७)

"त्वं न इन्द्र वाजयुः" इति मैत्रावरूणिर्वसिष्ठः ऋषिः। इन्द्रो देवता। गायत्री छन्दः। प्रधानाज्यहवने विनियोगः॥

ओ३म् त्वं न इन्द्र वाजयुस्त्वं गव्युः शतक्रतो। त्वं हिरण्ययुर्वसो स्वाहा॥ इन्द्रायेदं न मम। (८) आहुतयः॥ (ऋ. ७. ३१. ३)

(८)

"सं होत्रं स्म पुरा नारी" इति इन्द्राणी ऋषिका। इन्द्रो देवता पक्तिः छन्दः। प्रधानाज्यहवने विनियोगः॥

ओ३म् सं होत्रं स्म पुरा नारी समनं वाव गच्छति। वेधा ऋतस्य वीरिणीन्द्रपत्नी महीयते विश्वस्मादिन्द्र उत्तरः स्वाहा। इन्द्रायेदं न मम (८) आहुतयः॥ (ऋ. १०.८६.१०)

(९)

"इन्द्राणीमासु नारिषु" इति इन्द्रः ऋषिः । इन्द्राणी देवता । पंक्तिः छन्दः । प्रधानाज्यहवने विनियोगः ॥

ॐ इन्द्राणीमासुनारिषु सुभगामहमश्रवम् । न ह्यस्या ।
अपरं चन जरसा मरते पतिर्विश्वस्मादिन्द्र उत्तरः स्वाहा ॥
इन्द्राण्यै इदं न मम । (८) आहुतयः ॥ (ऋ. १०, ८६, ११)

(१०)

"जातवेदसे" मारीचः कश्यपः ऋषिः । जातवेदाः अग्निः देवता । त्रिष्टुप् छन्दः । प्रधानाज्यहवने विनियोगः ॥

ॐ जातवेदसे सुनवाम सोममरातीयतो निदहाति वेदः ।
स नः पर्षदति दुर्गाणि विश्वा नावेव सिन्धुं दुरितात्यग्निः
स्वाहा ॥ जातवेदसेऽग्नय इदं न मम । (८) आहुतयः ॥

(११)

"त्र्यम्बकं" वसिष्ठः ऋषिः । रूद्रो देवता अनुष्टुप् छन्दः । प्रधानाज्य हवने विनियोगः ॥

ॐ त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् ।
उर्वारूकमिव बन्धनान्मृत्योर्मुक्षीय माऽमृतात् स्वाहा ।
रूद्रायेदं न मम । (८) आहुतयः ॥

(१२)

"दिवो गभस्तिररतिः पृथिव्याः" इति वासिष्ठो गणपतिऋषिः । वैश्वानरो देवता त्रिष्टुप्छन्दः । श्रीवासिष्ठप्रसादसिद्धये प्रधानाज्यहवने विनियोगः ॥

ॐ दिवो गभस्तिररतिः पृथिव्यास्त्वेषं रूपं दिद्युतो
योऽन्तरिक्षे । वैश्वानरः सहसा वाँ अमर्त्यो मधुमन्माऽऽरोहतु
दस्म ईक्षां स्वाहा ॥ वैश्वानरायेदं न मम ॥ (८) आहुतयः ।

(१३)

"अक्रमिष्ट भुवनेषु" इति वासिष्ठोगणपतिऋषिः । विष्णुर्देवता । गायत्री छन्दः । श्रीवासिष्ठप्रसादसिद्धये प्रधानाज्यहवने विनियोगः ॥

ॐ अक्रमिष्ट भुवनेषु ब्रह्मणाऽहं वितूर्यतः । प्रवरोऽथास्मि
विप्रः स्वाहा ॥ विष्णव इदं न मम ॥ (८) आहुतयः ॥

(१४)

"भद्रं नः" इति ऐन्द्रो विमदः ऋषिः। अग्निः देवता। एकपदा विराट् छन्दः। प्रधानाज्यहवने विनियोगः॥

ॐ भद्रं नो अपि वातय मनः स्वाहा॥

अग्नय इदं न मम॥ (८) आहुतयः॥ (ऋ. १०, २०, १)

* इति प्रधानयजनं समाप्तम् *

इतः परं स्वस्वगुरूपदिष्टैः विशिष्टैर्मन्त्रैः तत्तद्देवतायै हविर्होतुमर्हन्ति॥

श्रीवासिष्ठेनैवोपदिष्टोऽयं यजुर्वेदान्तर्गतः औपनिषदो दुर्गामन्त्रः॥

(१५)

"तामग्निवर्णाम्" इति विश्वे देवाः काण्डर्षयः दुर्गहा अग्निः। श्री दुर्गा देवता। त्रिष्टुप् छन्दः। सर्वदुर्गनिवारणार्थे आज्यहवने विनियोगः॥

ॐ तामग्निवर्णां तपसा ज्वलन्तीं वैरोचनीं कर्मफलेषु जुष्टाम्। दुर्गां देवीं शरणमहं प्रपद्ये सुतरसि तरसे नमः स्वाहा॥ दुर्गायै इदं न मम॥ (९) आहुतयः।

॥ अथ उत्तराङ्गहवनम् ॥

"संसमिद् युवसे वृषन्" इति चतुर्ऋ चस्य सूक्तस्य संवनन आङ्गिरसः ऋषिः। अग्निः सञ्ज्ञानं च देवता। अनुष्टुप् छन्दः। तृतीयायाः त्रिष्टुप् छन्दः। समानभावोदयार्थे उत्तराङ्ग हवने विनियोगः॥

(१) ओ३म् सं समिद् युवसे वृषन्नग्ने विश्वान्यर्य आ।
इळस्पदे समिध्यसे स नो वसून्या भर स्वाहा।
अग्नय इदं न मम॥ (१) आहुतिः। (ऋ१०. १९१, १)

(२) ओ३म् सङ्गच्छध्वं सं वदध्वं सं वो मनाँसि जानताम्।
देवाभागं यथा पूर्वे संजानाना उपासते स्वाहा॥
संज्ञानायेदं न मम। (१०-१९१-२)

(३) ओ३म् समानो मन्त्रः समितिः समानी समानं मनः
सहचित्तमेषाम्। समानं मन्त्रमभि मन्त्रये वः
समानेन वो हविषा जुहोमि स्वाहा॥
संज्ञानायेदं न मम॥ (ऋ. १०-१९१-३)

(४) ओ३म् समानी व आकूतिः समाना हृदयानि वः ।
समानमस्तु वो मनो यथा वः सुसहासति स्वाहा ॥
संज्ञानायेदं न मम ।

[इति उत्तराङ्गयजनं समाप्तम्]

॥ स्विष्टकृद् यजनम् ॥

"अग्ने यदद्य" इति बार्हस्पत्यो भरद्वाजः ऋषिः । अग्निर्देवता । जगती छन्दः । स्विष्टकृद्यजने विनियोगः ॥

ओ३म् अग्ने यदद्य विशो अध्वरस्य होतः पावक शोचे वेष्ट्वं हि यज्वा । ऋता यजासि महिना वियद् भूर्हव्या वह यविष्ठ या ते अद्यस्वाहा ॥ स्विष्टकृतेऽग्नय इदं न मन ॥

॥ इध्मसन्नहनहवनम् ॥

"कद् रूद्राय प्रचेतस" इति घौर कण्वो ऋषिः । रूद्रो देवता । गायत्री छन्दः इध्मसन्नहनहवने विनियोगः ॥

ओ३म् कद् रूद्राय प्रचेतसे मीळ्हुष्टमाय तव्यसे ।
वोचेम शन्तमं हृदे स्वाहा । रूद्रायेदं न मम ॥ (ऋ. १.४३.१)

॥ अथ प्रायश्चित्ताहुतयः ॥

(१)

"अतो देवा" इदं विष्णुरिति काण्वो मेधातिथिः ऋषिः देवाः विष्णुश्च देवता । गायत्री छन्दः । प्रायश्चित्ताज्यहवने विनियोगः ।

"ॐ अतो देवा अवन्तु नो यतो विष्णुर्विचक्रमे ।
पृथिव्याः सप्त धामभिः स्वाहा ॥ देवेभ्य इदं न मम ॥

(ऋ. १-२२-१६)

(२)

ॐ इदं विष्णुर्विचक्रमे त्रेधा नि दधे पदम् । समूळ्हमस्य
पांसुरे स्वाहा ॥ विष्णव इदं न मम ॥ (ऋ. १-२२-१७)

(३)

"यत् पाकत्रा" इत्याप्त्यस्त्रितः ऋषिः । अग्निर्देवता । त्रिष्टुप् छन्दः । प्रायश्चित्ताज्यहवने विनियोगः ॥

ॐ यत् पाकत्रा मनसा दीनदक्षा न यज्ञस्य मन्वते
मर्त्यासः । अग्निष्टद्धोता क्रतुविद् विजानन् यजिष्ठो देवाँ
ऋतुशो यजाति स्वाहा ॥ अग्नय इदं न मम ॥

(४)

"यद् वो देवा" अभितपाः ऋषिः । सूर्यो देवता जगती छन्दः । प्रायश्चित्ताज्यहवने विनियोगः ॥

ओ३म् यद् वो देवाश्चकृम जिह्वया गुरु मनसो वा प्रयुती देवहेळनम् । अरावा यो नो अभिदुच्छुनायते तस्मिन् तदेनो वसवो निधेतन स्वाहा ॥ सूर्यायिदं न मम ॥ १०, ३७, १२

(५)

"अचित्ती यच्चकृमा" इति गौतम वामदेव ऋषिः । अग्निर्देवता । त्रिष्टुप् छन्दः । प्रायश्चित्ताज्यहवने विनियोगः ॥

ओ३म् अचित्ती यच्चकृमा दैव्ये जने दीनैर्दक्षैः प्रभूती पूरूषत्वता । देवेषु च सवितर्मानुषेषु च त्वं नो अत्र सुवतादनागसः स्वाहा ॥ अग्नय इदं न मम ॥ ४–५४–३

(६)

"यत् किञ्चेदं" इति मैत्रावरुणिर्वसिष्ठः ऋषिः । वरुणो देवता । जगती छन्दः । प्रायश्चित्ताज्यहवने विनियोगः ॥

ओ३म् यत् किञ्चेदं वरुण दैव्ये जनेऽभिद्रोहं मनुष्या ३श्चरामसि ॥ अचित्ती यत् तव धर्मा युयोपिम मा नस्तस्मादेनसो देव रीरिषः स्वाहा ॥ वरुणायेदं न मम ॥

(ऋ. ७.८९,५)

॥ सर्वप्रायश्चित्तहवनम् ॥

(७)

"त्रातारमिन्द्रं" इति गर्ग भारद्वाजे ऋषिः। इन्द्रो देवता त्रिष्टुप् छन्दः। प्रायश्चित्ताज्य हवने विनियोगः।

ओ३म् त्रातारमिन्द्रमवितारमिन्द्रं हवे हवे सुहवं शूरमिन्द्रम्। ह्वयामि शक्रं पुरुहूतमिन्द्रं स्वस्ति नो मघवा धात्विन्द्रः स्वाहा। इन्द्रायेदं न मम ॥ (ऋ. ६,४७,११)

(८)

"इन्द्रः सुत्रामा स्ववाँ" इति गर्ग भाराद्वाजे ऋषिः। इन्द्रो देवता। त्रिष्टुप् छन्दः। प्रायश्चित्ताज्यहोमे विनियोगः ॥

ओ३म् इन्द्रः सुत्रामा स्ववाँ॑ऽअवोभिः सुमृळीको भवतु विश्ववेदाः। बाधतां द्वेषो अभयं कृणोतु सुवीर्यस्य पतयः स्याम स्वाहा ॥ इन्द्रायेदं न मम ॥

(९)

"तस्य वयमिति" भारद्वाजेः गर्ग ऋषिः । इन्द्रो देवता । त्रिष्टुप् छन्दः । प्रायश्चित्ताज्य हवने विनियोगः ॥

ॐ तस्य वयं सुमतौ यज्ञियस्याऽपि भद्रे सौमनसे स्याम । स सुत्रामा स्ववाँ इन्द्रो अस्मे आराच्चिद् द्वेषः सनुतार्युयोतु स्वाहा । इन्द्रायेदं न मम ॥

व्यस्त–समस्त व्याहृतीनां परमेष्ठी प्रजापतिः ऋषिः । प्रजापतिः देवता । बृहती छन्दः । सर्वप्रायश्चित्ताज्यहवने विनियोगः ।

(१) ॐ भूः स्वाहा ॥ अग्नय इदं न मम ॥

(२) ॐ भुवः स्वाहा ॥ वायव इदं न मम ॥

(३) ॐ स्वः स्वाहा ॥ सूर्यायेदं न मम ॥

(४) ॐ भूर्भुवः स्वः स्वाहा ॥ प्रजापतये इदं न मम ॥*

---

* अस्मिन् प्रायश्चित्तहवने नव मन्त्रा निर्दिष्टाः ॥ तत्र आद्यं मन्त्रद्वयं विनाऽपि यथा सौकर्यं होतुं शक्यम् । यावच्छक्यं यावदिष्टं वा ग्राह्यम् ॥

॥ अथ ब्रह्मप्रायश्चित्तानि ॥

ॐ भूः स्वाहा ॥ अग्नय इदं न मम ॥

ॐ भुवः स्वाहा वायव इदं न मम ॥

ॐ स्वः स्वाहा सूर्यायेदं न मम ॥

ॐ भूर्भुवः स्वः स्वाहा ॥ प्रजापतये इदं न मम ॥*

---

* ब्रह्मैव स्वयं एतद् ब्रह्मप्रायश्चित्तं जुहुयात् ।

* पूर्णाहुतिहवनम् *

(यजमानः पूर्णाहुतिं उत्तिष्ठान्नेव जुहुयात्)

"धामन् ते विश्वं" इति गौतमः वामदवो ऋषिः। अग्निः, देवता। जगती छन्दः। पूर्णाहुति हवने विनियोगः।

ॐ धामन् ते विश्वं भुवनमधिश्रितमन्तः समुद्रे हृद्य १
न्तरायुषि। अपामनीके समिथे य आभृतस्तमश्याम
मधुमन्तं त ऊर्मिं स्वाहा॥

अग्नय इदं न मम॥ *

"विज्योतिषा बृहता" इति कुमार आत्रेयः ऋषिः। अग्नि देवता। त्रिष्टुप् छन्दः। संस्त्राबहवने विनियोगः"

---

* अत्र समग्रेण सूक्तेन पूर्णाहुतिर्विहिता "समुद्रादूर्मिः" इत्येकादशर्चस्य सूक्तस्य गौतमो वामदेवः ऋषिः अग्निः, सूर्यः, आपः, गावः, घृतं वा देवताः, त्रिष्टुप्, अन्त्या जगती छन्दः, पूर्णाहुति हवने विनियोगः (तच्च यथा शक्यमनुष्ठेयम्)।

ॐ वि ज्योतिषा बृहता भात्यग्निराविर्विश्वानि कृणुते महित्वा । प्रादेवीर्मायाः सहते दुरेवाः शिशीते श्रृङ्गे रक्षसे विनिक्षे स्वाहा ॥ अग्नय इदं न मम ॥

॥ पूर्णपात्रनिनयनम् ॥

(१)

"आपः पृणीत भेषजम्" इति आम्बरीषः सिन्धुद्वीपः ऋषिः । आपो देवताः । गायत्री छन्दः । पूर्णपात्रनिनयने विनियोगः ॥

ॐ आपः पृणीत भेषजं वरूथं तन्वे ३ मम । ज्योक् च सूर्यं दृशे ॥

इति तत् प्रणीतापात्रस्थं जलमभिमन्त्रयेत ॥

(२)

"सविता पश्चातात्" इति लुशो धानाकः ऋषिः । सविता देवता । त्रिष्टुप् छन्दः । पूर्णपात्रजलसेचने विनियोगः ॥

ॐ सविता पश्चातात् सविता पुरस्तात् सवितोत्तरात्तात् सविताऽधरात्तात्। सविता नः सुवुतु सर्वतातिं सविता नो रासतां दीर्घमायुः ॥

इति कुशैः तत् पूर्णपात्रजलं चतुर्दिक्षु सर्वतश्च सिञ्चेत् । ततःस्वशिरसि मार्जयेत् ।

(३)

"आपो आस्मान्" इति देवश्रवाः ऋषिः । आपो देवताः । त्रिष्टुप् छन्दः । मार्जने विनियोगः ॥

ॐ आपो अस्मान् मातरः शुन्धयन्तु घृतेन नो घृतप्वः पुनन्तु । विश्वं हि रिप्रं प्रवहन्ति देवीरुदिदाभ्यः शुचिरापूत एमि ॥ इति ॥

"इदमापः प्रवहत" आपो अद्यान्वचारिषमिति आम्बरीषः सिन्धुद्वीपः ऋषिः । आपो देवताः । अनुष्टप् छन्दः ।

॥ अवभृथाभिषेके विनियोगः ॥

(४) ॐ इदमापः प्रवहत यत् किञ्च दुरितं मयि ।

यद् वाऽहमभि दुद्रोह यद् वा शेप उतानृतम् ॥

(५) ॐ आपो अद्यान्वचारिषं रसेन समगस्महि ।

पयस्वानग्न आगहि तं मा संसृज वर्चसा ॥

इति तज्जलं पत्न्याः अञ्जलौ (तदभावे) स्वाञ्जलौ वा परिपूर्य आत्मानं पत्नीं च अभिषिञ्चेत् ॥ तदेतदवभृथस्नानं भावयेत् ॥

॥ अग्नेः उपस्थानम् ॥

"अग्ने त्वं न" इति चतसृणां गौपायनाः (लौपायना वा) बन्धुः, सुबन्धुः, श्रुतबन्धुः, विप्रबन्धुश्चैकर्चा ऋषयः । अग्निर्देवता । द्विपदा विराट् छन्दः । अग्न्युपस्थाने विनियोगः ॥

(१) ॐ अग्ने त्वं नो अन्तम उत त्राता शिवो भवा वरूथ्यः ।

(२) ॐ वसुरग्निर्वसुश्रवा अच्छानक्षि द्युमत्तमं रयिंदाः ।

(३) ॐ स नो बोधि श्रुधीहवमुरुष्याणो अघायतः समस्मात् ।

(४) ॐ तं त्वा शोचिष्ठ दीदिवः सुम्नाय नूनमीमहे सखिभ्यः ।

इति तिष्ठन्नेव प्रणमन् उपस्थानं कुर्यात् ।

॥ प्रदक्षिणा ॥

"त्वमग्ने प्रयतदक्षिणं नरम्" इति हिरण्यस्तूप आङ्गिरसः ऋषिः । अग्निः देवता । जगती छन्दः । अग्नेः प्रदक्षिणावर्तने विनियोगः ॥

(१) ओं त्वमग्ने प्रयतदक्षिणं नरं वर्मेव स्यूतं परिपासि विश्वतः। स्वादुक्षद्मा यो वसतौ स्योनकृज्जीवयाजं यजते सोपमा दिवः॥ (ऋ. १,३१,१५)

"जातवेदसे" मारीचः कश्यपः ऋषिः। जातवेदा अग्निः देवता। त्रिष्टुप् छन्दः। अग्नेः प्रदक्षिणावर्तने विनियोगः॥

(२) ओं जातवेदसे सुनवाम सोममरातीयतो निदहाति वेदः। स नः पर्षदति दुर्गाणि विश्वा नावेव सिन्धुं दुरिताऽत्यग्निः॥ (ऋ. १,९९,३)

"अग्ने नय सुपथा" इति मैत्रावरुणिः अगस्त्यो ऋषिः। अग्निः देवता। त्रिष्टुप् छन्दः। अग्नेः प्रदक्षिणावर्तने विनियोगः॥

(३) ओं अग्ने नय सुपथा राये अस्मान् विश्वानि देव वयुनानि विद्वान्॥ युयोध्य१स्मज्जुहु राणमेनो भूयिष्ठां ते नमउक्तिं विधेम॥ (ऋ. १, १८९,३)

॥ विभूतिधारणम् ॥

"मा न स्तोक" इति कुत्सः ऋषिः । रूद्रो देवता । जगती छन्दः । विभूति ग्रहणे विनियोगः ।

ॐ मानस्तोके तनये मान आयौ मानो गोषुमानो अश्वेषुरीरिषः । वीरान् मानो रुद्र भामितोऽवधीर्हविष्मन्तः सदमि त्वा हवामहे ॥

"त्र्यम्बकं" इति वसिष्ठः ऋषिः । रुद्रो देवता । अनुष्टुप् छन्दः । विभूतिधारणे विनियोगः ॥

ॐ त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् ॥
उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय माऽमृतात् ॥

इति ललाटे, कण्ठे, नाभौ । हृदये, बाहुद्वये शिरसि च तां विभूतिं धारयेत् ॥

ततः परिस्तरणानि विसृज्य, अग्निं परिसमूह्य, परिषिच्य, विश्वानि न इति तृचेन अग्निं पुनरर्चेत् ॥

॥ ब्रह्मणे दक्षिणादानम् ॥

"दक्षिणाऽश्वम्" इति आङ्गिरसः दिव्य ऋषिः । दक्षिणा देवता । जगती छन्दः । दक्षिणाप्रदाने विनियोगः ॥

ॐ दक्षिणाऽश्वं दक्षिणा गां ददाति दक्षिणा चन्द्रमुत यद्धिरण्यम् । दक्षिणाऽन्नं वनुते यो न आत्मा दक्षिणां वर्म कृणुते विजानन् ।

"इति ब्रह्मणे यथाशक्ति दक्षिणां दद्यात् ॥

॥ ब्राह्मणः उत्थापनम् ॥

"उत् तिष्ठ ब्रह्मणस्पते" इति घौरः कण्वो ऋषिः । ब्रह्मणस्पतिः देवता । बृहती छन्दः । ब्रह्मोत्थापने विनियोगः ॥

ॐ उत्तिष्ठ ब्रह्मणस्पते देवयन्तस्त्वेमहे ॥ उप प्रयन्तु मरुतः सुदानव इन्द्र प्राशूर्भवा सचा ॥ इति ब्रह्माणं विसृज्य उत्थापयेत् ॥

॥ अग्नेः स्वस्थानप्रतिष्ठार्थं अभ्यर्थना ॥

"यज्जातवेदः" इति आङ्गिरसो मूर्धन्वान् ऋषिः । सूर्यवैश्वानरो जातवेदा अग्निः देवता । त्रिष्टुप् छन्दः । अग्नेः स्वस्थानप्रतिष्ठार्थे प्रार्थने विनियोगः ॥

ॐ यज्जातवेदो भुवनस्य मूर्धन्नतिष्ठो अग्ने सह रोचनेन । तं त्वा हेम मतिभिर्गीर्भिरुक्थैः स यज्ञियो अभवो रेदसि प्राः ॥

॥ इन्द्राय यज्ञासमर्पणेन गोत्राभिवादनम् ॥

"यदद्य कच्च बृत्रहन्" इति सुकक्ष आंगिरसः ऋषिः । इन्द्रो देवता । गायत्री छन्दः । यज्ञ समर्पणे तदभिवादने च विनियोगः ।

ॐ यदद्य कच्च बृत्रहन् उदगा अभि सूर्य । सर्वं तदिन्द्र ते वशे ॥ इति गोत्राभिवादनम् । (८-९३-४)

इति—अनेन यज्ञेन विश्वाध्यक्षो यज्ञात्मा सर्वदेवतात्मा भगवान् इन्द्रः प्रीयताम् ॥

ॐ भद्रं नो अपि वातय मनः ।

ॐ शान्तिः शान्तिः शान्तिः ॥

अन्ते द्विराचामेत् ॥ वैश्वदेवं कृत्वा गोग्रासं दद्यात् ॥

॥ अथ गोग्रासदानम् ॥

(१) आ गावो अग्मन्नुत भद्रमक्रन् त्सीदन्तु गोष्ठेरणयन्त्वस्मे ।
प्रजावतीः पुरुरूपा इह स्यु रिन्द्राय षूर्वीरुषसो दुहानाः ।

(२) इन्द्रो यज्वने पृणते च शिक्षत्युपेद्ददाति न स्वं मुषायति ।
भूयो भूयो रयिमिदस्य वर्धय न्नभिन्ने खिल्ये निदधाति देवयुम् ।

(३) गावो भगो गाव इन्द्रो मे अच्छान् गावः
सोमस्यपथमस्य भक्षः । इमा या गावः स जनास इन्द्र
इच्छामीद्धृदा मनसा चिदिन्द्रम् ॥

(४) यूयं गावो मेदयथा कृशं चिदश्रीरं चित् कृणुथा सुप्रतीकम् । भद्रं गृह कृणुथ भद्रवाचो बृहद् वो वय उच्यते सभासु ॥ इति ॥

॥ ब्राह्मणपूजनम् ॥

नमो महद्भयो नमो अर्भकेभ्यो नमो युवभ्यो नम आशिनेभ्यः । यजाम देवान् यदि शक्नवाम मा ज्यायसः शंसमा वृक्षि देवाः ॥

॥ सुवासिनीपूजनम् ॥

(१) इमा नारीरविधवाः सुपत्नीराञ्जनेन सर्पिषा संविशन्तु । अनश्रवो अनमीवः सुरत्ना आ रोहन्तु जनयो योनिमग्रे ॥

(२) संहोत्रं स्म पुरा नारी समनं वाव गच्छति ॥ वेधा
ऋतस्य वीरिणीन्द्र पत्नी महीयते विश्वस्मादिन्द्र उत्तरः ॥

(३) इन्द्राणीमासु नारिषु सुभगामहमश्रवम्। न ह्यस्या
अपरं चन जरसा मरते पतिर्विश्वस्मा दिन्द्र उत्तरः ॥

ततः परं ब्राह्मणान्, बटून्, सुवासिनीः कुमारीश्च भोजयेत् ॥
तेभ्यो यथाशक्ति दक्षिणां दद्यात् ॥

॥ इति सम्पूर्णः इन्द्रयज्ञ-प्रयोगः ॥

इत्यादि विज्ञापयिता रचयिता
वासिष्ठान्तेवासी दैवरातः

॥ ई ॐ श्री०॥

॥ श्रीवासिष्ठाष्टकम् ॥

श्रीमन्महर्षिं रमणं यतीन्द्रं, प्रज्ञानमूर्तिं परमं गुरुं स्वम् ॥
गुरुं च वासिष्ठमुनिं कवीन्द्रं, योगादुपास्ते हृदि दैवरातः ॥

१

श्रीमत्सर्वज्ञकल्पः सकलगुणनिधिः पूजनीयः परात्मा
साक्षाद्विद्येशवाचस्पतिरिव सकलश्रौततत्त्वार्थवेत्ता ॥
अन्तेवासी महर्षेः रमणभगवतो राजयोगी तपस्वी
वासिष्ठः श्रीमुनीन्द्रो जयति गणपतिः काव्यकण्ठः कवीन्द्रः ॥

२

यस्य श्री भारती सा करकमलगता प्रेमभावादुदीर्णा
काव्यालङ्कारपूर्णा सकलरसकलाऽऽनन्दमावर्षयन्ती ॥
जिह्वाग्रे नृत्यतीव स्वरससुरतदा नित्यमेवाविरासीद्
वासिष्ठः श्रीमुनीन्द्रो जयति गणपतिः काव्यकण्ठः कवीन्द्रः ॥

३

शक्तो ज्ञानक्रियाभ्यां पतिरपि विदुषां यस्तपोज्ञानयोगाद्
विद्यागर्वादिहीनो गुरूरिह जगतः सन् त्स्वयम्प्रज्ञ एव ॥
बालोन्मत्तादिरूपोऽप्युदधिरिव सदा सर्वविज्ञानपूर्णः
वासिष्ठः श्रीमुनीन्द्रो जयति गणपतिः काव्यकण्ठः कवीन्द्रः ॥

४

श्रीविद्यापूर्णचन्द्रो विनयगुणकलाशीतलः प्रेमपूर्णः
प्रज्ञाशक्त्या प्रचण्डो घृणिरपि तपसा सर्वविज्ञानयोगात् ॥
शान्तः सत्त्वप्रसादान्नतजनहितकृत् सामरस्यप्रसन्नो
वासिष्ठः श्रीमुनीन्द्रो जयति गणपतिः काव्यकण्ठः कवीन्द्रः ॥

५

यो नित्यं सच्चरित्रः सुविमलहृदयो दिव्यवाणीविभूतिः
ज्येष्ठप्राणात्मनिष्ठा प्रणिहितसुमतिः सत्यधर्मोर्जितात्मा ॥
सत्यात्मा स्वात्मनैव स्वयमुदितपरासंविदा पूर्णँविद्यो
वासिष्ठः श्रीमुनीन्द्रो जयति गणपतिः काव्यकण्ठः कवीन्द्रः ॥

६

ज्ञाने योगे वसिष्ठः स्वयमिह भगवान् सर्वविद्यास्वतन्त्रः
पूर्णोवाल्मीकिरन्यः कविकुलतिलको वेदवित् कालिदासः ॥
लेखे नामानुरूपः प्रचुरतरकृतेर्भारतार्थप्रकाशाद्
वासिष्ठः श्रीमुनीन्द्रो जयति गणपतिः काव्यकण्ठः कवीन्द्रः ॥

७

प्रज्ञानात्मप्रकीर्णः प्रणवरसमयो ब्रह्मणस्पत्युदीर्णः
प्रज्ञाशक्त्याऽवतीर्णो जगति कुलपतिर्भारतीपूर्णयोगात् ॥
वेदार्थस्य प्रकाशादृष्टिकुलतिलको विश्वविद्यातपस्वी
वासिष्ठः श्रीमुनीन्द्रो जयति गणपतिः काव्यकण्ठः कवीन्द्रः ॥

८

श्रीमद्विद्वद्वरेण्यः परमपुरुषहृदयोगतत्त्वप्रशास्ता
मुक्तात्मा प्रेममूर्तिः परमरसमयः सत्यमन्त्रो मनस्वी ॥
सत्यज्ञानामृतात्मा प्रभुरमलयशा ज्येष्ठराजः सुधार्णः
वासिष्ठः श्रीमुनीन्द्रो जयति गणपतिः काव्यकण्ठः कवीन्द्रः ॥

९

सर्वेषां प्राणिनां स्वः परमसुखकरः सद्विभूतिः सुकीर्तिः
सर्वैः सम्पूजनीयो जनसुखनिरतः स्वाश्रयः सज्जनानाम् ॥
वासिष्ठः श्रीमुनीन्द्रो जगति गणपतिः सर्वकामप्रपूर्त्यै
संसेव्यो दैवरातप्रमुदितकविताऽस्रग्धरास्रग्धरोऽसौ ॥

सद्गुरुप्रसादवाक्सुपुष्पपद्यमालिका
श्रीवसिष्ठभूमुनीन्द्रकाव्यकण्ठमौलिका ॥
सर्ववित्सुधाप्रपूर्णवेदचन्द्रिकालिका
दैवरातहृत्प्रफुल्लवाक्प्रसूनमल्लिका ।

॥ इति श्रीवासिष्ठाष्टकं सम्पूर्णम् ॥

॥ ईं ॐ श्रीः ॥

॥ श्रीवासिष्ठवैशिष्ट्यपञ्चकम् ॥

॥ वैदिकेन्द्र देवताया एव विश्वाधिपत्येन सर्वधर्माश्रयत्वम् ॥

१

अध्यक्षः सन् परेशो निखिलजगदधिष्ठानभूतोऽन्तरात्मा
सर्वेषामप्यभीष्टः परमरसतमः पूरुषः पूर्णसत्त्वः ॥
सोऽयं सत्त्वाद्विशिष्टः श्रुतिमखमुखतः पारमैश्वर्ययोगाद्
वासिष्ठेष्टः समिष्टो गणपतिरुदगादिन्द्र एवेति शिष्टः ॥

॥ मन्त्रयोगास्त्रशक्तिसाधकत्वम् ॥

२

यज्ञैर्योगैस्तपोभिः सुनियतमतिभिर्ज्ञानभावक्रियाभिः
शास्त्रास्त्रादिप्रयोगाज्जगति विजयकृन् मन्त्रयोगाशास्त्रशक्तिः ॥
भक्त्यै भुक्त्यै विमुक्त्यै सकलसुखकृते शान्तिशक्त्यादिसिध्यै
वासिष्ठोद्दिष्टमेतत् सकलजगहितं वस्तुसिद्धं विशिष्टम् ॥

* महाभारतार्थस्य वैदिकतत्त्वसंशोधनम् *

३

संसिद्धे भारतार्थे श्रुतिमुखनिशितं गूढतत्त्वं विशिष्टं
सम्पूर्णं राजकार्यं निखिलजनमनः शान्तिसौख्याय सिद्धम् ॥
सत्यं वेदे प्रसिद्धं गणपतिलिखितं व्यासवक्त्रादुदीर्णं
वासिष्ठेनाभिगीतं प्रभवति हितकृद् भारताभीष्टसिध्यै ॥

* ध्रुवास्मृतेरेव अमृततत्वनिर्णयः *

४

सर्वोद्दिशादिसिद्धा परमसुखकृतेऽप्यैहिकामुष्मिकादौ
स्वज्ञानाद् या ध्रुवा स्याज्जनिमृतिशतशोप्यप्रमादात्स्मृतिः सा ॥
तद्वै सत्यामृतत्वं श्रुतिषु निगदितं सर्वशास्त्रप्रसिद्धं
वासिष्ठः सन् ध्रुवात्मस्मृतिभिरनुजगौ सर्वलोके विशिष्टः ॥

[स्वयं शिष्यान्वेषणस्वभाव योगातनूतनच्छन्दोदर्शन सिद्धान्त प्रतिष्ठापनम् ॥]

५

सच्छिष्यान्वेषणेन स्वयमनुसरणादात्मसात्कर्तुमिच्छन्
सिद्धः सर्वज्ञकल्पो जगति परगुरुः सर्वतन्त्रस्वतन्त्रः ॥
सिद्धान्तं दर्शनेऽपि प्रतिविद्दधदसौ नूतनच्छन्दसां च
वासिष्ठः सन् विशिष्टो जगति विजयते मन्त्रदृक्च्छ्रीमुनीन्द्रः ॥

६

इन्द्रस्यैवेश्वरत्वं त्रिभुवनविजये मन्त्रयोगास्त्रशक्तिः
सत्यत्वं भारतार्थे श्रुतिभिरमृतता सा ध्रुवा संस्मृतिः स्यात् ॥
सच्छिष्यान्वेषकत्वाज्जगति नवतरच्छन्दसां दर्शनं च
वासिष्ठे सद्विशिष्टं सकलगुणमयं पञ्चकं तत्त्वरूपम् ॥

॥ ईं ॐ श्रीः ॥

* श्रीरमणाविभक्त्यष्टकम् *

१

श्रीमत्पाराशरोऽयं प्रमुदितवदनः पावनः पार्वतीयः
प्रत्यग्दृग् देवकल्पो विगतभवभयः सर्वदा सुप्रसन्नः ॥
आत्मन्येव प्रलीनः सकलगुणनिधिर्मौनमुद्रोपपन्नो
दृष्टः संतृप्तचित्तो "रमणमुनिरहो" ? सच्चिदानन्दलीनः ॥

२

यं दृष्ट्वैवावशिष्टं भवति पुनरहो ? नेह कर्तव्यतायां
सद्यश्चित्तप्रसादाद्विगलति मनसः सर्वसङ्कल्पजालम् ॥
वृत्तिः शाम्यत्यनेका विधिमनुजनिता द्वेषिणो वा निषेधात्
सन्तं पाराशरं तं गुरुरमणयतिं सन्ततं चिन्तयामि ॥

३

येनेयं चित्रसृष्टिर्बाहिरिव मनसा स्वप्नवत् सम्प्रदृष्टा
दृष्टिः प्रत्यग्गताऽपि प्रणतभयहरी संविमृष्टा दयार्द्रा ॥
स्वार्थाः सङ्गस्य हानात् तदनुगतधियः सर्वतः सन्निरस्ताः
त्रातस्तेनेह मर्त्यो रमणभगवता धन्यतां याति सद्यः ॥

४

यस्मै तत्त्वार्थवेत्रे परमपविदे स्वात्मनो बोधयित्रे
स्वानन्दस्यापयित्रे जनिमरणभयात् प्राणिनस्त्राणयित्रे ॥
स्वात्मानं प्राप्य बुध्या शरणमुपगता धन्यता यान्ति लोकाः
तस्मै पाराशरायों रमणभगवते ज्ञानदात्रे नमस्ते ॥

५

यस्मात् सम्पूर्णकामाद् विगतकलिमलाद् दिव्यवागात्मदेहान्
नित्यं प्रद्योतमानाज् जगति हि तपसा संस्थितप्रज्ञतोऽन्यः ॥
सन्तप्तानां प्रजानां विषयविषधरैर्नैवकश्चिच्छरण्यः
तस्मात् पाराशरान्मे रमणमुनिवरादात्मनः संविदस्तु ॥

६

यस्याहंमेमतिर्हि स्वयमिह गलिता संविदेवावशिष्टा
धर्माधर्मप्रपञ्चः सह विधिभिरहो सम्प्रशान्तो निषेधैः ॥
इष्टानिष्टे समाने स्थितिरपि जगति प्राणिनां वा हितार्था
तस्येदं पादयुग्मं रमणभगवतः सम्प्रपद्ये शरण्यम् ॥

७


यस्मिन्नत्याश्रमस्थे ह्यभमुपगते वीतवर्णप्रपञ्चे
ब्रह्मिष्ठे नित्यतृप्ते परमरसनिधौ सिद्धयोऽष्टौ प्रणम्राः ॥
कामाश्च प्राप्तु कामाः सुखमिह परमं संविशन्तीव नित्यं
तस्मिन् पाराशरे मे रमणमुनिवरे धीन्द्रियाण्यारमान्तम् ॥

८

स्वामिन् त्सर्वार्तिहारिन्त्रय परमगुरो निर्मलज्ज्ञानमूर्ते
वासिष्ठस्य प्रसादात् तव चरणयुगं प्राप्य सर्वैर्दुरापम् ॥
पूर्णाः कामा इहेति प्रणिहितमनसा धन्यतां भावयन्तं
त्राहीमं पापजालाद् रमण मुनिपते ? "दैवरातं" प्रपन्नम् ॥

"रमणं" रमणीयचिद्विकासं शरणं संस्मरणीयसद्विलासम् ॥
परमं परमार्थतत्त्वबोधं कलये कल्मषकीलनप्रबोधम् ॥

॥ इति श्री दैवरातविरचितं श्रीरमणविभक्त्यष्टकं सम्पूर्णम् ॥



Maharshi Daivarat with Shri Babu Rajendra Prasad



Maharshi Daivarat with Shri Lal Bahaddur Shastri

Reprinted by -
Devashrava Daivaratha Sharma
Ashokavana, Gokarn

आकृति प्रिंटर्स्, गोकर्ण